किं न सतां विगर्हितं ७ स गामुदस्तात्सलिलस्य गोचरे विन्यस्य तस्यामदधात्स्वसत्त्वं अभिष्टुतो।
विश्वसृजा प्रसूनै रापूर्यमाणो विबुधैः पश्यतोरेः ८ परागनुषक्तं तपनीयोपकल्पं महागदं कांच
नचित्रदंशं मर्माण्यभीक्ष्णं प्रतुदंतं दुरुक्तैः प्रचंडमन्युः प्रहसंस्तं बभाषे ९ ॥ रामायनमः

विश्वसृजाभिष्टुतो विबुधैश्च प्रसूनैरापूर्यमाणः पार्श्वांतरे विश्वसृजां प्रसूनैर्विबुधैरभिष्टुत इति सलिलस्योद।
स्तादुपरि अवहारगोचरे दृष्टिगोचरे विन्यस्य स्वसत्त्वं साधारशक्तिं निहितवान् अरेः तस्य पश्यत एव ८ परागनुष
क्तं लग्नं तपनीयोपकल्पं सुवर्णाभरणं कांचनमयं चित्रदंशः कवचं यस्य तं दैत्यं प्रचंडमन्युत्वं अपि देवा।
दिके चानुकरणमात्रं दैन्यवाक्यभीतानां देवानां भयनिवृत्तये वस्तुतस्तु तेन तथानुक्तत्वेन कोपादिहेत्वभावात् ९

श्री॰
भाग॰
टी॰
९२

अभवायनाशायभृतःपुष्टःवस्तनस्तुमोलायभृतोभूतःआक्षिप्तइत्यर्थः येभवान्यमोत्हेलयावीर्यैराजयतीतितथाव
स्तनस्तत्त्वतएवास्मिन्लाजयतीतिसंस्थाप्यहत्वायोगमायारूपमविंसंबलयस्यअल्पपौरुषंयस्मात्तत्वासम्प
कृष्णप्रणियितभक्त्यारुद्रिसिवीकृतत्वमर्थः ।कृष्णप्रणतान्प्रातिआप्यायनीतितथाअस्मत्‌नोविनिधातुः सुहृदी
युत्वः संसारतुः रवानिस्यजेना आयामियमः त्वस्मन्निवर्यवानपिमोवयसीतिभावः ।५। अस्मत्कुञ्जकृतयापिवाद

त्वंनःसपत्नैरभवायकिंभृतोयोमायायाहंसमस्वरान्यरोवत्रजित् त्वांयोगमायाबलमल्पपौरुषं ।संस्था
प्यकृष्णप्रणतेसुहृत्कुश्च ।५। त्वयिस्थितेगदयाशीर्षाण्यस्मद्भजच्युतपायेचतभं ।बलिर्हरं
त्यृषयोयेचदेवाःस्वयंसर्वेनभविष्यमूलाः ।५। सतुयमानोविहरुनैसोमरैर्दृष्ट्वाग्रगैंगासुपल
त्याभीता तोदस्यसविरगादेतुमथ्याज्ञाहाहृतःसकवेग्रेयैयोभः ९२

याश्रपणीयां शीर्षियस्यनयाभूलेत्वयिसुखंस्थितेसतियेतुभ्यमथनावलिंहरंतिनवीनाभक्ताःयेचपूर्वेभक्ताः
ऋषयोदेवास्तेसर्वेस्वयमेवायमविनेवमूलानभविष्यतिकिंतुरुकमूलाभविष्यंतीत्यर्थः ।५। सहृदिःश्र
वेडुरुक्रान्तवतामरा: शास्त्रविधानैःतेःतुयमानोव्यथमानःदृष्ट्वाग्रगताः पृथ्वीभीतामालत्यतोदंडरुक्रम्या
यास्यपन्सहमानएवनिर्गतःकवेरागृहत्तिनीवस्तनस्तउस्त्रितः असैः निमिसभूतैःतुयमानःयथास्या
हिंसाब्रह्मादीनांव्यथांदृष्ट्वानुकंपयापीड्यमानइत्यर्थः तोदस्यसनिर्गस्याप्ययैनवार्थः ॥९२॥ ९३

आरात् शीघ्रं विस्मयः नष्टगर्वः वीरशाये रणाङ्गणे रूपाणि वराहाद्यवतारान् ॥ ३१ ॥ इति श्रीभावार्थे तृतीयस्कंधे सप्तद
शः ॥ १७ ॥ अहो दशा हिरण्याक्षवराहयोः निर्विशेषं महायुद्धं देवलोकैर्निरूप्यते ॥ प्रतियोद्धारं कुत्रामनाः ।
शयिष्यसे इति यदुक्तं तद्विगणय्यावगणय्य वितानयतः दुर्मदः ॥ १ ॥ अभिजयतीति अभिजित् तं श्रीहरिं प्रकर्षेण उन्नी
यमानां अवनिं येन अग्रदंष्ट्रया दंष्ट्राग्रेण स्वरुचः हिरण्याक्षतेजांसि अरुणश्रिया अक्ष्णा नेत्रेण मुष्णन्तं तिरस्कुर्वन्त
अहो चित्रं वनगोचरो मृगः वारिचरो वराहः ॥ २ ॥ एहि आगच्छ रसौकसां पातालवासिनां नः अस्माकं समर्पिता अस्मया

तं वीरमारादभिपद्य विस्मयः शयिष्यसे वीरशये श्वभिर्वृतः ॥ यस्त्वद्विधानामसतां प्रशान्तये रूपाणि ध
त्ते सदनुग्रहेच्छया ॥ ३१ ॥ इति श्रीभागवते तृतीयस्कंधे सप्तदशोऽध्यायः ॥ १७ ॥ मैत्रेय उवाच ॥ तदेवमाक
र्ण्य जलेशभाषितं महामनास्तद्विगणय्य दुर्मदः ॥ हरेर्विदित्वा गतिमङ्ग नारदाद्रसातलं निर्विविशे
त्वरान्वितः ॥ १ ॥ ददर्श तत्राभिजितं धराधरं प्रोन्नीयमानावनिमग्रदंष्ट्रया ॥ मुष्णन्तमक्ष्णा स्वरुचो
ऽरुणश्रिया जहास चाहो वनगोचरो मृगः ॥ २ ॥ आहैनमेह्यज्ञ महीं विमुञ्च नो रसौकसां विश्वसृजेय
मर्पिता ॥ न स्वस्ति यास्यस्यनया ममेक्षतः सुराधमासादितसूकराकृते ॥ ३ ॥

पातालावतरणस्थानत्वं इति भावः हिरण्याक्षेणाधिक्षेपार्थं प्रयुक्तापि भारती वस्तुतो भगवन्तं स्तौति तथाहि
वनगोचरः जलशायी नारायणः स एव योगिभिर्मृग्यते इष्टान्वाहे तं मृगयन्ते इति मृगः अज्ञेय स्मात्सर्व
ज्ञ इत्यर्थः सर्वाश्रयमायस्मात् हे सुरोत्तम ॥ मम ईक्षमाणस्यापि सतः मा मना इत्यापि अनया सह वर्तमानो नोऽस्म
दीयस्वस्ति समस्तमंगलं राज्यं यास्यसि प्राप्स्यसि नात्र संदेहः ॥ तथा अस्मत्कृपया विमुञ्चेत्यर्थः ॥ आसादिता ली
लया स्वीकृता सूकराकृतिर्येन ॥ ३ ॥

मनसा शौर्येण वीर्येण बलेन वरेण चोत्सिक्तं गर्वितं असृण्यं निरंकुशं निलिल्यिरे लीना बभूवुः २२ स्वेन महसा तिरोहिता
न् दृष्ट्वा मत्वा क्षीवान् मत्तान् क्षीवान् इति पाठे घोरमहीनान् २३ सन्नाश्च ससाध्वसाश्च धियो येषां वर्चसा तेजसा प्रधर्षिता अभिभूताः
सन्तः २५ महोर्मीन् अभिजघ्ने मौर्व्या मारयतीति मूर्वकार्ष्यायसं तन्मय्या यद्वा मूर्वनामतृणविशेषः तन्मयरज्ज्वा

स वै तिरोहितान् दृष्ट्वा महसा स्वेन दैत्यराट् सेन्द्रान्देवगणान्क्षीवानपश्यन्व्यनदद्भृशं २३ ततो निवृत्तः
क्रीडिष्यन्गम्भीरं भीमनिःस्वनं विजगाहे महासत्वो वार्धिं मत्त इव द्विपः २४ तस्मिन्प्रविष्टे वरुणस्य सै
निका यादोगणाः सन्नधियः ससाध्वसाः अहन्यमाना अपि तस्य वर्चसा प्रधर्षिता दूरतरं प्रदुद्रुवुः २५
स वर्षपूगानुदधौ महाबलश्चरन्महोर्मीन्श्वसनेरितान्मुहुः मौर्व्याभिजघ्ने गदया विभावरीमा
सेदिवांस्तात पुरीं प्रचेतसः २६ तत्रोपलभ्यासुरलोकपालकं यादोगणानामृषभं प्रचेतसं स्मय
न्प्रलब्धुं प्रणिपत्य नीचवज्जगाद मे देह्यधिराज संयुगं २७ त्वं लोकपालोऽधिपतिर्बृहच्छ्रवा वी
र्यापहो दुर्मदवीरमानिनां विजित्य लोकेऽखिलदैत्यदानवान्यद्राजसूयेन पुरायजत्प्रभो २८ स एव
मुत्सिक्तमदेन विद्विषा दृढं प्रलब्धो भगवानपांपतिः रोषं समुत्थं शमयन्स्वया धिया व्यवोचदं
गोपशमं गता वयं २९ पश्यामि नान्यं पुरुषात्पुरातनाद्यः संयुगे त्वां रणमार्गकोविदं आराधयिष्य
त्यसुरर्षभेहि तं मनस्विनो यं गृणते भवादृशाः ३० ॥

दृढं वद्धं येषामर्थः विभावरीसंज्ञामासेदिवान् प्राप्तः २६ असुराणां लोकः पातालं तस्य पालकं प्रलब्धुं उपह
सितुं प्रणिपत्य २७ यद्यस्माद्राजसूयेन भवान् अयजत २८ उपशमं युद्धादिकौतुकादुपरमं २९ युद्धमा
र्गनिपुणं त्वां यः तोषयिष्यति तेन इहि गच्छ गृणते स्तुवंति ३० २ ॥

ब्रह्मपुत्रानृते विना तेषां स्वशापपरिज्ञानात् ॥१५॥ व्यज्यमानमात्मपौरुषं पूर्वसिद्धं स्वपौरुषं ययोः ॥१६॥ निरुद्धा व्याप्ताः काष्ठा दिशो याभ्यां स्फुरंत्यंगदानि येषु ते भुजा ययोः अंगदेति टाबंतत्वमार्षं शोभनाकांचीयुक्तया कट्या ॥१७॥ यम योर्मध्ये यः स्वदेहात्प्रथममजायत तं यथा हिरण्यकशिपुं विदुः सा दितिः यं प्रथममसूत तं हिरण्याक्षं यथा विदुः तथा नाम कृतवानित्यर्थः ॥ अयं भावः यदा हि गर्भाधानसमये योनिपुष्पे विशद्बीजं द्विधा विभक्तमादिपश्चाद्भावेन प्रवि

दृष्ट्वान्यांश्च महोत्पातानतत्संस्थविदः प्रजाः ॥ ब्रह्मपुत्रानृते भीता मेनिरे विश्वसंप्लवं ॥१५॥ तावादिदैत्यौ सहसा व्यज्यमानात्मपौरुषौ ॥ ववृधातेऽश्मसारेण कायेनाद्रिपती इव ॥१६॥ दिविस्पृशौ हेमकिरीटकोटिभिर्निरुद्धकाष्ठौ स्फुरदंगदाभुजौ ॥ गां कंपयंतौ चरणैः पदे पदे कट्या सुकांच्यार्कमतीत्य तस्थतुः ॥१७ प्रजापतिर्नाम तयोरकार्षीद्यः प्राक्स्वदेहाद्यमयोरजायत ॥ तं वै हिरण्यकशिपुं विदुः प्रजा यं तं हिरण्याक्षमसूत साग्रतः ॥१८॥ चक्रे हिरण्यकशिपुर्दोर्भ्यां ब्रह्मवरेण च ॥ वशे सपालाँल्लोकांस्त्रीनकुतोमृत्युरुद्धतः ॥१९॥ हिरण्याक्षोऽनुजस्तस्य प्रियः प्रीतिकृदन्वहं ॥ गदापाणिर्दिवं यातो युयुत्सुर्मृगयन्रणं ॥२०॥ तं वीक्ष्य दुःसहजवं रणत्कांचननूपुरं ॥ वैजयंत्या स्रजा जुष्टमंसन्यस्तमहागदं ॥२१ मनोवीर्यवरोत्सिक्तमसृण्यमकुतोभयं ॥ भीता निलिल्यिरे देवास्तार्क्ष्यत्रस्ता इवाहयः ॥२२॥ ॥

ष्टानि तदा यमौ भवतः तयोश्चोत्पत्तिः प्रवेशक्रमविपर्ययेण मातुः प्रसूतिः यदा बिंदोर्द्विधाभूतं बीजं पुष्पं प्रविश्य तरुँ तदा भवतो गर्भौ स्थिति वेशविपर्ययादिति पिंडसिद्धिस्मरणात् ॥ अतः स्वदेहात्पूर्वं यो जातः तस्य हिरण्यकशिपुरिति ॥ दितेः प्रथमं प्रसूतं तस्य हिरण्याक्ष इति नाम कृतवानिति ॥१८॥ दोर्भ्यामुद्धतः ब्रह्मवरेणाकुतोमृत्युः ॥१९॥ मनसा शौर्येण वीर्येण बलेन वरेण चोत्सिक्तं गर्वितं असृण्यं निरंकुशं निलिल्यिरे लीना बभूवुः ॥२२॥ सनमहसा निरो

कशि

वार्धिः समुद्रो विमना इवोद्गता ऊर्मयो यस्मात् तत्क्षुभितमुदरं यस्य ऊर्मयोर्यस्मिन् उदपानैर्वापीकूपादिभिः सहिताः
शुष्काणि पंकजानि यासां ॥७॥ परिधयः परिवेषाः सराह्वोः राहुग्रस्तयोः निर्घाता निरभ्रगर्जितानि रथवन्निर्ह्रा
दतस्ताः ध्वनयः विवरेभ्यो गिरिगह्वरेभ्यः ॥८॥ सृगालानामुलूकानां च टंकारैः ध्वनिभिः सह ॥९॥ ग्रामसिंहाः

चुक्रोश विमना वार्धिरुदूर्मिः क्षुभितोदरः । सोदपानाश्च सरितश्चुक्षुभुः शुष्कपंकजाः ॥७॥ मु
हुः परिधयोऽभूवन्सराह्वोः शशिसूर्ययोः । निर्घाता रथनिर्ह्रादा विवरेभ्यः प्रजज्ञिरे ॥८॥ अंतर्ग्रा
मेषु मुखतो वमंत्यो वह्निमुल्बणं । सृगालोलूकटंकारैः प्रणेदुरशिवं शिवाः ॥९॥ संगीतवद्रो
दनवदुन्नमय्य शिरोधरां । व्यमुंचन्विविधा वाचो ग्रामसिंहास्ततस्ततः ॥१०॥ खराश्च कर्कशैः क्षत्तः
खुरैर्घ्नंतो धरातलं । खार्काररभसा मत्ताः पर्यधावन्वरूथशः ॥११॥ रुदंतो रासभत्रस्ता नीडादुद
पतन्खगाः । घोषेऽरण्ये च पशवः शकृन्मूत्रमकुर्वत ॥१२॥ गावोऽत्रसन्नसृग्दोहास्तोयदाः पूय
वर्षिणः । व्यरुदन्देवलिंगानि द्रुमाः पेतुर्विनानिलं ॥१३॥ ग्रहान्पुण्यतमानन्ये भगणांश्चापि दीपि
ताः । अतिचेरुर्वक्रगत्या युयुधुश्च परस्परं ॥१४॥ २

ध्वानः ॥१०॥ कर्कशैः तीक्ष्णैः हे क्षत्तः खार्कारो गर्दभजातिशब्दः तस्मिन् रभसः संभ्रमो येषां वरूथशः संघशः
॥११॥ रासभात्त्रस्ताः ॥१२॥ सर्वत्र कांततः गावोऽत्रसन् असृग्दोहाश्च बभूवुः देवलिंगानि व्यरुदन् प्र
तिमानां रुदनस्राव आसीदित्यर्थः ॥१३॥ पुण्यतमान् गुरुबुधादीन् भगणान् नक्षत्राणि ॥ अन्ये क्रूर
ग्रहा मंगलादयः अतिचेरुः अतिक्रम्य जग्मुः वक्रगत्या वक्रतया युयुधुश्च ॥१४॥ २

तयोर्वधेन आत्मतिरस्कृतं तेजो वा प्रतिविधिः शङ्काः यत एतर्हि उदासीनो भगवानेव तदेव विधास्यति इत्याह्वयति ॥३५॥
तथापि कोऽप्युपायो विचार्यतामिति चेत्तत्राह ॥ विश्वस्येति ॥ त्रयाणां गुणानामीशः स एव सर्वेषां लोकानां क्षेमं
क्षेमं विधास्यति विमृशेन विमर्शेन ॥३७॥ इति श्रीमद्भा० तृतीये षोडशः ॥१६॥ ततः समादेशेन कालेन अपाल्लिकि भयकरं ॥
हिरण्याक्ष प्रभावं सूचयति दितिरित्यादिभिः ॥ क्षेमं विधास्यतीति ब्रह्मवचनात् तत्र शङ्कया त्यक्ताः ॥१॥ भर्तुरादे

तयोरसुरयोरद्य तेजसा यमयोर्हि वः ॥ आक्षिप्तं तेज एतर्हि भगवांस्तद्विधित्सति ॥३६॥ विश्वस्य यः स्थि
तिलयोद्भवहेतुराद्यो ॥ योगेश्वरैरपि दुरत्यययोगमायः ॥ क्षेमं विधास्यति स नो भगवांस्त्र्यधीशस्त
त्रास्मदीयविमृशेन कियानिहार्थः ॥३७॥ इति श्रीभागवते तृतीयस्कन्धे षोडशोऽध्यायः ॥१६॥ मैत्रेय
निशम्यात्मभुवा गीतं कारणं शङ्कयोज्झिताः ॥ ततः सर्वे न्यवर्तन्त त्रिदिवाय दिवौकसः ॥१॥ दितिस्तु भ
र्तुरादेशादपत्यपरिशङ्किनी ॥ पूर्णे वर्षशते साध्वी पुत्रौ प्रसुषुवे यमौ ॥२॥ उत्पाता बहवस्तत्र निपे
तुर्जायमानयोः ॥ दिवि भुव्यन्तरिक्षे च लोकस्योरुभयावहाः ॥३॥ सहाचला भुवश्चेलुर्दिशः सर्वाः प्रज
ज्वलुः ॥ सोल्काश्चाशनयः पेतुः केतवश्चार्तिहेतवः ॥४॥ ववौ वायुः सुदुःस्पर्शः फूत्कारानीरयन्मु
हुः ॥ उन्मूलयन्नगपतीन्वात्यानीको रजोध्वजः ॥५॥ उद्धसत्तडिदम्भोदघटया नष्टभागणे ॥ व्योम्नि
प्रविष्टतमसा न स्म व्यादृश्यते पदम् ॥६॥ २॥

घालोकान्न पालान् स्वीयदृष्ट्या उद्धरिष्यतीति वाक्यात् तयोः यमयोः पतिशङ्किनी देवो यद्वर्षशं कस्मात्
अचलैः सहिता भुवः अवेपन्त केतवः धूमकेतवः अर्तिहेतवः ॥४॥ फूत्कारान् नितरां ध्वनीन् वायुर्गतान् करणेन
नागपतीन् महावृक्षान् वात्यावातसमूहोऽनीकं यस्य रजः एव ध्वजो यस्य ॥५॥ उद्धसन्त्य इव तडितो येषु तेषामम्भोदानां घ
टया सम्यक् नष्टभागणाः सूर्यादिग्रहा यस्मिन् पदं स्थानं न व्यादृश्यत ॥६॥

श्री. भाग. टी. ९०

नेत्रोत्सवजनकं विकुंठं हरं तेन त्रिधा मे सर्वं वैकुंठलोकं स्वयंप्रकाशं प्रकाशान्तरापेक्षं सत्वपरिणामत्वात् ॥ ॥ अनु
मत्वानुज्ञाप्य ॥२८॥ मय्येव लग्नमनसे इदं युक्तमेव यद्यपि सनकादीनां क्रोधो न संभवति। तव भगवत्पार्षदयोः आ
स्यगाप्रातिकूल्येन च भगवतः स्वभक्तोपेक्षा न वैकुंठवासिनां प्रवर्तनं तथापि भगवतः सिसृक्षादिवशाद्विप
नुत्वा समत्वनितदमिषामत्यबलत्वान्न्यपापदानां तत्यबलत्वेपि प्रतिपत्तानुपपन्नेरनावबद्धास्यानि निवारणा

ब्रह्मोवाच ॥ अथ ते मुनयो दृष्ट्वा नयनानंदभाजनं ॥ वैकुंठं तदधिष्ठानं विकुंठं च स्वयंप्रभं ॥ २७ ॥ भगवा
वंतं परिक्रम्य प्रणिपत्यानुमान्य च ॥ प्रतिजग्मुः प्रमुदिताः शंसंतो वैष्णवीं श्रियं ॥ २८ ॥ भगवाननुगा
वाह यातं मा भैष्टमस्तु शं ॥ ब्रह्मतेजः समर्थोपि हंतुं नेच्छे मतं तु मे ॥ २९ ॥ मयि संरंभयोगेन निस्ती
र्य ब्रह्महेलनं ॥ प्रत्येष्यतं निकाशं मे कालेनाल्पीयसा पुनः ॥ ३० ॥ द्वाःस्थावादिश्य भगवान् विमानश्रेणिभूषणं ॥ वादिश्य भगा५
सर्वातिशयया लक्ष्म्या जुष्टं स्वं धिष्ण्यमाविशत् ॥ ३१ ॥ तौ तु गीर्वाणऋषभौ दुस्तराद्धरिलोकतः ॥
हतश्रियौ ब्रह्मशापादभूतां विगतस्मयौ ॥ ३२ ॥ तदा विकुंठधिषणात्तयोर्निपतमानयोः ॥ हाहाका
रो महानासीद्विमानाग्र्येषु पुत्रकाः ॥ ३३ ॥ तावेव ह्यधुना प्राप्तौ पार्षदप्रवरौ हरेः ॥ दितेर्जठरनिर्विष्टं
काश्यपं तेज उल्बणं ॥ ३५ ॥ २ ॥

प्रवर्तिते भुवनकोशे अनुगृहीतवन्तः क्ष्माप्यत्याजेन प्रतिपत्तो विभायवद्धकौतुकं संपादनीयमिति भगवान् वैकुंठवासिनं सं
नः सर्वे संगाढं तेन तदिदं शुकं पापं यामस्य एव निर्मितमिति मामेष मिति ब्रह्मशापमिति हंतुं नेच्छे मतं तु मे इत्यादि ॥ ३० ॥ ब्र
ह्मशापेन प्रमेयहेतुः निकाशं समीपे ॥ ३१ ॥ दुस्तरात् ब्रह्मशापात् पातात् हरिलोकतः पतनात् विगतिर्गमनं हरिलोकनिर्वह
तश्रियावबभूतावितिविमानस्ययोनस्य ॥ ३४ ॥ विकुंठधिषणात् स्थानात् हे पुत्रकाः देवाः ॥ ३३ ॥ काश्यपं

अनन्यगोपं त्वयैव रक्षणीयं द्विजोत्तमानां कुलं यदि हि स्फुटं त्वेन योग्यमानः खिलात् यत्नात् तेन नात्मन्य षष्ठी प्रयोगाः स्पष्टः श्लोकः
दैवं पश्याविद् मार्गो निन्दति नाशोयास्यति कृष्ण भक्तश्रेष्ठस्य हि यस्मात् तत अनर्हणो असत्कृतेन यत्र गृहीष्यत तत्र के हि
गीतास्य ॥ २ ॥ यद्यदाचरति श्रेष्ठः तत्तदेवेतरो जनः ॥ स यत्प्रमाणं कुरुते लोकः तदनुवर्तते इति ॥ २२ ॥ नश्यति क्षितिवे
नमाहुः तद्दृष्ट मार्गो नाशन मेवेति लोकोक्तिः सनातनि धिलात् जनायशाविभात निष्कोः अत एव निजशक्तिभिः गजान्शिमि
स्तत् पातित धर्मप्रतिपदस्य अतः स्वव श्रेष्ठ कुलेव न तिर्युक्ते वत अस्मदन्तो न्यूनप्रवर्तते तिसन्ना आह्लानिकारी तच्चाह एताव।

तत्त्वं द्विजोत्तम कुलं यदि हानगोपं गोप्तास्त्वमिः स्वमर्हणा न सत्कृतेन ॥ तर्ह्येव नं च्युतिविव नवदेवपंक्तालोको
गृहीष्यतु स्वयम् हि तत्र समाणां ॥ २४ ॥ तत्तेन भीहमिव सम निश्चिवितितो ॥ तेसंसनाय निजशक्तिभिस्तु
तावे ॥ ने तावता श्रियपते स्तव विश्वधर्म ॥ तेजः त्वत्तन्त प्रवर्तनस्य सत्त्वविनोदः ॥ २५ ॥ एवं बानयादेदसमर्थो
शुभवात्विय भैच तिं नवातदत्रमनमाहिनिर्व्यलीकं ॥ अस्माकमवायुदविनोष्यितां सदंडो येनागसो वय
मंत्वमहि किल्बिषाणां ॥ २६ ॥ श्रीभगवानुवाच ॥ एतौ सुरेतर वाति प्रतिपद्य सद्यः संरंभ संभृत समाध्य
नुबद्ध योगौ ॥ भूयः सकाशमुपयास्यत आशु यो वः शापो मयैव निमितस्तदवेत विप्राः ॥ २७ ॥ राम

तायर्म ज्ञाणांनुचे जनेन्नावनन्तस्य न मनंकृत वत्सव तेज्ञः प्रभावः तन्तं नवीणां यत्नः सुन समनाद्दि तेविनोदः
शापा अहं पवित्र स्त्व विज्ञापयेति यं वेतिय वासंदेडं विधास्यति भवानतृमिंनघिको जीविको वानन्सैव प्रत्नुमन्यास
हे येव यं निरपराधावेतौ किल्बिषाणां पापेन अनुंगुत्वाहि योजितवेन ॥ २८ ॥ मत्कावितन्वात् शापस्य तु पकोकेनापराध
इत्याय्वा सयन्नाह ॥ एतौ सद्य एवा सद्योनिंप्राप्य भूयो पिमन्ममीपमागमिष्यतः संरंभेणक्रोधावेशोन संभृतः
संवृद्धः यः समाधिः एकाग्रता तेनानुबद्धौ दृढीकृतो योगौ ययोः हे विप्राः यो वा शापः प्रयुक्तः शापः तदितिस

श्री॰ भा॰ टी॰ ५६

विविक्तचरणैः विशुद्धैः पवित्रैः अनुवर्तमानां सेव्यमानामपि यो नात्याद्रियत नातीवाङ्गीकृतवान् स एवंभूतस्त्वं
अयं भावः श्रयं नासीति लंपटतया लक्ष्मीः त्वां सेवते कथं एवं हि सा मे ते श्रये ह्यनाग्रहीम युक्तः चेचलः चस
चोत्क्रिया तायानुलक्ष्यासपविवादो निश्चलः सत्त्वमनेन तां विलावाणमत्यधिकस्यात ततो हे वत्सस्मितापियो
विज्ञानादिवत्सेवकसंयुष्मगीकृत्यापि तलस्यासाफल्ये नापि चरणो सविष्याम्मीति तदेवमयोक्तं कान्तानु
वर्तमानामपि तां त्वां नातीवाद्रियसे यतः परमभागवतेष्वेव प्रकृष्टसंगवान् स एव परमसौभाग्यनिधिः त्वं प्र
तो ब्राह्मणप्रसादात्मा श्रीन विद्वेषातोत्तिश्चलमपलाभेन नतिर्द्विजो नसमेजतिकिंचस्वत एव त्वं भागभाजनः

यस्मान्वा विविक्तचरितैरनुवर्तमानां नात्याद्रियत्परमभागवतः प्रसंगः । स त्वं द्विजानुपथपुण्यरजः
पुनीतः श्रीवत्सलक्ष्म किमगा भगभाजनस्त्वं ॥२१॥ धर्मस्य ते भगवतस्त्रियुग त्रिभिः स्वैः पद्भिश्चराचर
मिदं द्विजदेवतार्थं । नूनं भृतं तदभिघाति रजस्तमश्च सत्त्वेन नो वरदया तनुवा निरस्य ॥२२॥२

भजनीयानां गुणानां आश्रयः परमस्तु स्तुतं त्वां द्विजानुपथं पथि लग्नं यत्पुण्यरजः तथा श्रीवत्सलक्ष्म च किं
पुनीतः पवित्रीकृतः किं किमर्थं वा ते भग आगाः प्राप्तः भूषणत्वेन स्वीकृतवानसि अतो यत्सेवाचरणापस्य पवित्र
रणामित्यादिवचनेलोकसंग्रहमात्रमित्यर्थः ॥२१॥ धर्ममूर्तेः तवोचितमेवेत्याहुः त्रिभिः त्रिषु वयुगेषु अभिव्यक्ती
ति त्रियुगः यद्वा त्रीणि युगलानि त्रियुगाः षड्गुणास्तान्यस्य सन्तीति त्रियुगः हे त्रियुग धर्मरूपस्य तव
त्रिभिः पद्भिः स्वैः तपःशौचदयाभिः सत्यस्य धर्मस्यैव पिकलोचवर्तमानत्वात् त्रिभिः इत्युक्तं भृतं पा
लितं नोऽस्माकं वरदया सत्त्वेन तनुवा तत्त्वाभिरूप्यानदभिघाति तेषां पादानामभिघातकं रजस्तमश्च निराकृत्य द्वि
जानां देवप्रयोजनाय नूनं भृतं । यद्वा द्विलोपेन तु पं निरस्येति । अस्माकं न त्रिवर्तयेत्यर्थः ॥२२॥ ५६

तथा त्वाभिनंदतीति त्वामाते प्रहृष्टाः संतः प्रोचुः त्वमितोमांवि तात्वंयेषांकृपितेति येषां संजातरोषमकृपोप्यात्वेमांवि
तत्त्वमेवोक्तंआवयोआविष्कृतः पारमेष्ठ्यस्यपरमेश्वर्यस्य महोदयः परमात्कर्षोयेन तेअधिराजत्वमाविष्कृता
दाजशिदार्थआसणात्वानयतीतित्वात्वेमर्थः ॥१५॥ अथाद्ल सर्वप्रभवः सन्विहितमात्महतेनममइति उक्ता
मयापराधःकृतइतितथातद्नुग्रहोमेइत्यादिवचनेनममानुग्रहस्त्विति यस्यभाषसेतेनयच्चिकीर्षितंतन्मविज्ञः
किलेतिलोकशिदार्थसूचितंपरमार्थमाहुः विप्राणामितिदेवदेवानांदेवम्ब्रह्मानामपिभगवान्त्वमात्माचदे
वतेच ॥१७॥ लोकशिक्षार्थंनः प्रपंचात्रतइति अष्टभिः धर्मस्त्वत्तएवभवतिरस्मनेचत्वदवतारैः परमःफलरूपः

तेयोवामायायारब्धः पारमेष्ठ्यमहोदयं ॥ प्रोचुःप्रांजलयोविप्राःप्रहृष्टाःक्षुभितत्वच ॥१५॥ ऋत्वय
ऊचुः ॥ नवयंभगवन्विज्ञःतवदेवचिकीर्षितं ॥ कृतोमेनुग्रहश्चेति यदध्यक्षःप्रभाषसे ॥१६॥ ब्रह्मण्य
स्यपरंदैवंब्राह्मणाःकिलतेप्रभो ॥ विप्राणांदेवदेवानांभगवानात्मदैवतं ॥१७॥ त्वत्तःसनातनोधर्मो
रक्ष्यतेतनुभिस्तव ॥ धर्मस्यपरमोगुह्योनिर्विकारोभवान्मतः ॥१८॥ तरंतिह्यंजसामृत्युनिवृत्तायद
नुग्रहात ॥ योगिनःसभवान्किंस्विदनुगृह्येतयत्परैः ॥१९॥ यंवैविभूतिरुपयात्यनुवेलमन्यैरर्था
र्थिभिःस्वशिरसाधृतपादरेणुः ॥ धन्यार्पितांघ्रितुलसीनवदाममध्नो ॥ लोकंमधुव्रतपतेरिवकाम

यतएवगुह्यः गोप्यः नचस्वर्गादिफलवद्विकारीकिंतुनिर्विकारोमतः अतःएवंभूतस्यदेवंलोकपालामाश्रे
इतिभावः ॥१८॥ विपरीतंचदेमिमाहुः तरंतीतियस्यानुग्रहाद्देवनिवृत्ताविरक्ताः योगिनस्तस्यतेस्तनुतरं
तिसभवानेवैरनुगृह्येतेतिकिंस्विन्नकिंचिदित्यर्थः ॥१९॥ यथाक्रियतेवयावरणापस्यपविशेषेणसमयःत्वता
ऽखिलमलंप्रतिलब्धशीलमित्यादिनातद्गतमसंभावितमित्याहुः द्वाभ्यांयंवैविभूतिर्लक्ष्मीःअनुवेलमव
सरेउपयातिसेवतेभूतःपादरेणुर्यस्याःधन्यैःसुकृतिभिरर्पितंअंघ्र्योयत्तुलस्यानवदाममालातद्दामस्यानेय।

श्री॰ भा॰ टी॰ ५८

एवंभूतात्मवशीकर्त्रीत्याह ॥ येति पतः परुषं भावमाणानपि वात्सल्यात्संबोधयंतिमयियाधीः तया वासुदेव
दृष्ट्यास्वचर्ययंतः संतः तुष्यहृदः प्रीयमाणाश्चित्ताः स्मितमेव तथा तयोर्हितं परमतं संयेषां अत्र वाचा कलया सौम्य
तया वाचा गृणंतः स्तुवंतः पृथाऊपितमात्मज्ञस्त्रियः पिता सन्नुजोवापितरसह मित्रशुश्रूषान्वा तेरहस्यपाह
नावशीकर्ता ॥ ११ ॥ तत्रस्मान्मेवसायमभिप्रायं प्रज्ञानं तैश्चुष्मदयगाधो वितंमातिसयः प्राप्यमत्समीपे इत्याश्रा
स्वं वेतानदितिसमेतुग्रहस्भूतयोर्विवासः अचिरतः श्रीवृकल्पनां सेपायनां समाप्यनामिति ॥ १२ ॥ इष्णातीति ॥

येत्रास्यणान्मयिपियात्तिपतोर्चयितः तुष्यहृदः स्मितस्वयो त्तितपस्ववक्त्राः ॥ वाणेषात्तु वा वाकलयात्मज्ञ
वकृणंतः ॥ सेवोधयेमहमिवाहमुपाश्रितस्तेः ॥ ११ ॥ तन्मेस्वभर्तुरवसायमलब्धमासोपिश्रुपयति
क्रमणातिंश्रुतिपयसयः ॥ भूयो ममातिकमिमां तदनुग्रहो मे यत्कल्पनामपितृतोभुतयोर्विवासः
१२ ॥ ब्रह्मोवाच ॥ अथ तस्यामशनी देवी रुषिकुल्या सरस्वती ॥ नास्त्वा यमस्तु चरणानां नेषां मात्माप्यतप
न ॥ १३ ॥ सतीव्याहारायश्रावितो लक्ष्मीगुणवर्षगाहृदं ॥ विनास्यायाया यंगंभीरान विडः नत्रिकीर्षितं ५

यां देवी योतमानां करुषिकुल्यां ककपयोमेवा तद्रूपां करुषिकुल्यायोमेवा सरस्वतीवाच मात्स्यायत्तमापूर्यमनु
भूयसर्वप्रायोमस्तुनादश्नानामपिकोयविषयानामानां हिमतोरसानुभवाभावात् ॥ प्रियभावणामपि तस्मह
तेनेषां तुश्यात्मामतुः वात्स्यनश्लमितितनामम ॥ १२ ॥ सतीश्रेष्ठांव्यादायप्रस्थाय कर्णदेत्वे मर्यः ॥ तवी
मितादत्तवाग्रुकुमिरथैगहृवांडः एवं यां आगायांश्रमिप्रायतः ॥ गभीरामगर्वतः विगाह्यविवार्यापि किमस्या
मभिनंदति निंदति वा ॥ प्रसन्नकृतं देडवा संकोचयतीति न विडः ॥ १५ ॥ ॥ श्री राम ५८

किंच ब्राह्मणो ममैव श्रेष्ठं मुखमतो मुखमदनस्य तयामत्सुखेति तस्य कारणं वक्तुं नाहमिति वितानेयज्ञेयजमानस्य हवि
श्च्युतघृताप्लुतं दिक्हुतभुगग्निः तेन मुखेनादन् अश्नन्नपि तथा नाद्मि नाश्नामि यथा ततः ब्राह्मणस्य मुखतश्चरतः तवि
लोऽङ्गितं प्रायसान्निध्रुतिग्रासं दुसास्वादपूर्वकं चरतो भुञ्जानस्य ज्ञानिनो ब्राह्मणस्य मुखतो ऽश्नामि मयि समर्पितैः
कर्मफलैः तुष्टस्य निष्कामस्येत्यर्थः ॥ ८ ॥ येषाममलमङ्घ्रिरजो ऽहं किरीटैर्बिभर्मि तान्विप्रान्को न कुर्वीतापि कोऽन्या
न विषहेत कथंभूतो ऽहम् अखण्डा अनवच्छिन्ना विकुण्ठा अप्रतिहता योगमाया विलासभूता विभूतिर्यस्य तथाऽयस्य

नाहं तथाद्मि यजमानहविर्विताने श्च्योतघृतप्लुतमदन्हुतभुङ्मुखेन । यद्ब्राह्मणस्य मुखतश्चर
तो ऽनुग्रासं तुष्टस्य मय्यवहितैर्निजकर्मपाकैः ॥ ८ ॥ येषां बिभर्म्यहमखण्डविकुण्ठयोगमायाविभूति
रमलाङ्घ्रिरजः किरीटैः । विप्रांस्तु को न विषहेत यदर्हणाम्भः । सद्यः पुनाति सहचन्द्रललामलोकान् ९
ये मे तनूर्द्विजवरान्दुहतीर्मदीया भूतान्यलब्धशरणानि च भेदबुद्ध्याः । द्रक्ष्यन्त्यघक्षतदृशो ह्यहिमन्य
वस्तान् । गृध्रा । रुषा मम कुषन्त्यधिदण्डनेतुः । १० । २ ॥

मम अर्हणाम्भः पादोदकं चन्द्रललामेन रुद्रेण सहितान् लोकान्सद्यः पुनाति । एवंभूते ऽपीश्वरः परमपावनो ऽपि सा
ब्राह्मणा बिभर्मीति ९ । किंच मम तनूरूपिणस्तानि कानि द्विजवरान्दुहतीर्दोग्ध्रीर्गा इत्यर्थः । दुहन्ति दुहतीति पाठे ऽपि
गा एव विप्रस्वरूपात्त्वयि नेद्धमवता न मयैव स्वनाम्नो गा इति वचनात् । अलब्धशरणानि दीनानि भेदबुद्ध्याऽस्म
द्भिन्नत्वेन भवतीति दृष्ट्वा ये न द्रक्ष्यन्ति । अघेन हतानष्टा दृष्टिर्येषां तान् मम अधिदण्डनेता यो यमः त
स्य गृध्राः काकाद्याः । अहिवन्मन्युर्येषां ते रुषा क्रोधेन कुर्वन्ति चञ्चुभिः छिंदंति । १० ॥ ॥ ॥

यद्यस्मान्मां कदर्थीकृत्य तत्क्षीकृत्य बह्व्यपराधा भवति ॥ तथा कदर्थीकृत्य अतिक्रमं वः कृतवन्तौ ॥ २ ॥ तस्मात्तद एव दंडो
नीकृतः ॥ ३ ॥ हि यस्मात् ब्राह्मणा एव परं दैवतं तत्तस्मादद्य वः प्रसादयामि तत्र कोऽपराध इति चेत्तत्राह तद्धीति मदी
यैः पुंभिरसत्कृता इति यत्तदात्मकृतमेव मन्ये ॥ ४ ॥ किंच मम वैतानाभ्यां निष्कृतमित्याह ॥ यस्य स्वामिनो नाम
नि तस्य कीर्तिं नाशयति त्वचमुत्कुष्ठ ॥ ५ ॥ यस्य मे अमृतरूपं अमलं यशः तस्य श्रवणेन अवगाहः प्रवेशः श्वपचमभिव्याप्य
जगत्सद्यः ॥ तत्त्राणामेव पुनाति सोऽहं विकुंठो भवद्भ्यो हेतुभूतेभ्य उपलब्धा प्राप्ता सुष्ठु शोभना तीर्थभूता कीर्ति

श्रीभगवानुवाच ॥ एतौ तौ पार्षदौ मह्यं जयो विजय एव च ॥ कदर्थीकृत्य मां यद्वो बह्वक्रातामतिक्रमं ॥ २ ॥
यस्त्वेतयोर्धृतो दंडो भवद्भिर्मामनुव्रतैः ॥ स एवानुमतोऽस्माभिर्मुनयो देवहेलनात् ॥ ३ ॥ तद्वः प्रसादया
म्यद्य ब्रह्म दैवं परं हि मे ॥ तद्धीत्यात्मकृतं मन्ये यत्स्वपुंभिरसत्कृताः ॥ ४ ॥ यन्नामानि च गृह्णाति लो
को भृत्ये कृतागसि ॥ सोऽसाधुवादः तत्कीर्तिं हंति त्वचमिवामयः ॥ ५ ॥ यस्यामृतामलयशःश्रव
णावगाहः सद्यः पुनाति जगदाश्वपचाद्विकुंठः ॥ सोऽहं भवद्भिरुपलब्धसुतीर्थकीर्तिश्छिंद्यां स्व
बाहुमपि वः प्रतिकूलवृत्तिं ॥ ६ ॥ यत्सेवया चरणपद्मपवित्ररेणुं सद्यः क्षताखिलमलं प्रतिलब्धशीलं ॥
न श्रीर्विरक्तमपि मां विजहाति यस्याः प्रेक्षालवार्थ इतरे नियमान्वहंति ॥ ७ ॥

येन मः स्वबाहुस्थानीयमपि लोके स्वरमपि हन्यां का वार्ता अन्यस्य कथमर्थः ॥ स्वगुणानुवर्णनं तद्ब्राह्मणोत्कर्षार्थ
मेव ॥ ६ ॥ चरणपद्मयोः स्थितः पवित्रो रेणुर्यस्य अत एवाकृतो निरस्तोऽखिलस्य लोकस्य मलं येन यद्वा चरणाय पलयः
पवित्रो रेणुः यस्मिन्निखिलं मलं नष्टं येन अखिलामलो यस्मात् इति च विग्रहः प्रतिलब्धं प्राप्तं शीलं येन तं येषां सेवया एतेन
गुणा मम अत एव श्रीर्मां न जहाति प्रेक्षालवार्थं लोके न लेशार्थमितरे ब्रह्मादयः तेषां वः प्रतिकूलवृत्तिं

इदानीं स्वापराधं द्योतयंति भ किं प्रार्थयंते काममिति हे भगवन् दुइतः पूर्वं प्रस्माकं वृजिनेन भवत इदानीं सर्वाण्य
पि ज्ञानानि नियतः त्वद्द्रोऽपराधोऽप्रतः तेः स्ववृजिनैः निरयेषु कामेनास्माकं भवो जन्मास्तात् तु वितव्यं यदि नः चेतः ते
पदयोः रमेत अलिर्यथा कंटकैः राविध्यमानोऽपि पुष्पमधुरसे तन्मद्धृत विज्ञानविगाणाज्य यदि रमते अंघ्रिशोभाः शोभाया
स्ताः यथा तुलसी स्वगुणैः नैरपेक्षा त्वदंघ्रिसंबंधेनैव शोभंते तथा यदि नो वाचः शोभेरन् यदि तेः च गुणगणैः
पूर्यंते कर्णरंध्रः उत्सलम्बगाया सि वा यावकर्णनामार्थयंते अयं तत्वगृह्णोभिप्रायः कर्णरंध्रस्याकाशत्वात् गुणगणा

कामं भवः स्ववृजिनैर्निरयेषु नः स्याच्चेतोऽलिवद्यदि नु ते पदयो रमेत । वाचश्च नस्तुलसिवद्यदि तेंघ्रि
शोभाः पूर्येत ते गुणगणैर्यदि कर्णरंध्रः ॥ ४९ ॥ प्रादुश्चकर्थ यदिदं पुरुहूत रूपं तेनेश निर्वृतिमवा
पुरलं दृशो नः । तस्मा इदं भगवते नम इद्विधेम योऽनात्मनां दुरुदयो भगवान्प्रतीतः ॥ ५० ॥ इति श्री
भागवते तृतीयस्कंधे पंचदशोऽध्यायः ॥ १५ ॥ शुक उवाच । इति तद्गृणतां तेषां मुनीनां योगधर्मि
णां । प्रतिनंद्य जगादेदं विकुंठनिलयो विभुः ॥ १ ॥

नोऽस्माकं भवत्वात न कदाचिन्नश्वरा मतो नित्यमेव अवगीयमविष्यतीति ॥ ४९ ॥ अथ वयं कृतार्थाः स्मः इत्याहुः हे
पुरुहूत विपुलकीर्ते यदिदं प्रादुश्चकर्थ प्रकटितवानसि दृशो नेत्राणि अनात्मनामजितेंद्रियाणां दुरुदयोऽप्र
कटितवानसि दृशो नेत्राणि पि इतः इत्ययः प्रतीतोऽसि तस्मै तुभ्यं इदं नमो विधेम ॥ ५० ॥ इति श्रीभावार्थदीपिकायां तृ
तीयस्कंधे पंचदशोऽध्यायः ॥ १५ ॥ इत्थं सांत्वितैर्विप्रैः स्वजनमेः तपोऽर्थे नयोरस्वभावे पिक्षे नोऽनुग्रहं ईर्यौ ।
ते ॥ इति गृणतां तेषां तद्राक्यं प्रति जगाद ॥ १ ॥

निर्गुणस्य स्वरूपेण प्रकाशमभिनन्दन्ति इदानीं तु परमनमं वालस्य पुरुषस्य तन्मूर्तिप्रयत्नो ऽस्मि अहो भाग्यमस्माकमि
त्याहुः हे अनन्त यस्त्वं स्वरूपेण हृतोपि दुरात्मनामन्तर्हितो न सोऽस्मिन्नस्माकं न तर्हितो न भवसि नयनमूलं तत्त्वैव राद्धः
प्राप्तो ऽसि अनर्थतत्त्वाभावे हेतुः भवतः सकाशादुद्भवो यस्य तेन अस्मत्पित्रा यर्हि यदैव श्रुतं वर्णितरहः उपदिष्टरह
स्यः तदैव नः कर्णमार्गेण गुहां बुद्धिं गतः प्राप्तो ऽसीति ४५ ननु पित्रोपदिष्टं भवतामात्मतत्त्वमहं स्वरूपमहं तत्त्वमत्र
व स्वाविर्भावत्वान्नैवं अस्माकमभिन्नतया भेदनिरासादित्याहुः तत्त्वमिति हे भगवन् आत्मतत्त्वमेव परं तत्त्वं विदाम विद्मः

कुमारा ऊचुः योऽन्तर्हितो हृदि गतोऽपि दुरात्मनां त्वं सोऽद्यैव नो नयनमूलमनन्त राद्धः यर्ह्येव कर्णवि
वरेण गुहां गतो नः पित्रानुवर्णितरहा भवदुद्भवेन ४६ तत्त्वां विदाम भगवन्परमात्मतत्त्वं सत्त्वेन
संप्रति रतिं रचयन्तमेषां यत्तेऽनुतापविदितैर्दृढभक्तियोगैरुद्ग्रन्थयो हृदि विदुर्मुनयो
विरागाः ४७ नात्यन्तिकं विगणयन्त्यपि ते प्रसादं किम्वन्यदर्पितभयं भ्रुव उन्नयैस्ते ये ऽङ्ग त्वद
ङ्घ्रिशरणा भवतः कथायाः कीर्तन्यतीर्थयशसः कुशला रसज्ञाः ४८ ॥

प्रत्यभिजानीमः ननु निरूपाधेरात्मतत्त्वस्य कथमीदृशी मे मूर्तिः स्यात् अत आहुः सत्त्वेन विशुद्धसत्त्वमूर्त्या
एषां भक्तानां रतिं सुखं प्रतिदिनं संप्रति रचयन्तं आत्मानमेवाहुः यत्ते अनुतापः कृपा तेन विदितैर्दृढैर्भक्तियोगैः
श्रवणादिभिः उद्ग्रन्थयो हृदि विदुः ज्ञात्वा उद्ग्रन्थयो निरहंमानाः अतएव विगतरागाः ४७ स्वयमपि सक्तिं
प्रार्थयितुं भक्तानां सत्कारातिशयमाहुः आत्यन्तिकं मोक्षाख्यमपि तव प्रसादं ते न गणयन्ति नाद्रियन्ते किं तु किमु
तदन्यत् इन्द्रादिपदं ते भ्रुव उन्नयैः केवलं भ्रूभंगेनैवार्पितं निहितं भयं यस्मिन् तत् हे अङ्ग हे भगवन् ये भवतः कथारसज्ञाः

किं बहुना इंदिरायाः उतस्मितमनुभमेव सर्वसौंदर्यनिधिं विमर्दकरणां अवभवाव लोदर्यं उदयस्य हसमस्तमिति स्वानां भक्ता
नाम्धियां विरचितभुजैः स्वमनसा वचित किं तमित्यर्थः ॥ बहुसौष्ठवेन सौंदर्याणां युक्तं किंच मेरुसमभवस्य पुत्रस्य
भवतो वक्त्रं अवभासितमूर्तिप्रकटयंत अचलतनिरीक्षणकैः शिरोभिर्युदानेः सुरैः नमस्कृतः न विप्रायणात् माहात्म्याने
प्राणायेयाते ॥ ४० ॥ स्वहृपानंदाधिकारायितयाभत्तानानंदाधिकामाह ॥ नस्य पदारविंद किं जल्के केसरमिश्राय
तुलसीतस्यामकरंदेन युक्तो वायुः स्वविवरेण नासाच्छिद्रेणांतरजयां अस्मानंदमेवि नाम यिसतोभने विप्रह
यतिनो रामाये ॥ ४१ ॥ रूपकाविर्भसाप्रसमाह ॥ तेवैकिलवदनमिवासितपद्मस्य कोशपत्री भिःते असितपद्मकोश
अत्रोपस्थमिति ये कांतिसिंदिरायाः स्वानां धिया विरचितं वक्त्रसौष्ठवात् ॥ मरुंभवस्य भवतो वपुर्जेत
मेरोः नेत्रर्निरीक्षनविलसितश्चाकृताके ॥ ४२ ॥ तस्यारविंदनयनस्य पदारविंद ॥ किं जल्कमिश्रतुलसी
मकरंदवायुः ॥ अंतर्गतः स्वविवरेण चकार तेषां संक्षोभमक्षरजुषामपि चित्ततन्वोः ॥ ४३ ॥ ते वा अमुष्य
वदनासितपद्मकोशम् ॥ उद्वीक्ष्य सुंदरतराधरकुंददासम् ॥ लब्धाशिषः पुनरवेक्ष्य तदीयमंघ्रिद्वं
१०२ द्वंनखारुणमणिश्रयणं निदध्युः ॥ ४४ ॥ पुंसां गतिं मृगयतामिह योगमार्गैर्ध्यानास्पदं बहुमतं नयन
नाभिरामं ॥ पौंस्नं वपुर्दर्शयानमनन्यसिद्धैः ॥ औत्पत्तिकैः समगृणन्युतमष्टभोगैः ॥ ४५ ॥ ॥ राम
मितस्य भूतोपमास्मंदरतरे अरुणो अधरोष्ठे ॥ कुंदवद्धासो यस्मिंस्तं ॥ अतकुर्ध्वं वीक्ष्य लब्धमनोरथाः संतः नखा
वारुणमणयः तेषां अयणं आश्रयं भूतं अंघ्रिद्वंद्वं पुनरवेक्ष्य अधोदृष्ट्यावलोक्य पुनः पुनः एवं निरीक्ष्य युगपत्सर्वां
गलावण्यग्रहणाशक्तेः पुनः पुनः क्रमेण निरीक्ष्य पश्चात् निदध्युः ध्यातवंतः ॥ ४४ ॥ योगमार्गैर्गतिं मृगयतां पुं
सां ध्यानस्य विषयभूतं बहुमतं नयनाभिरामं देवहूतेनातद्रूपं पौंस्नं पौरुषं वपुः दर्शयंतं अनेषु असिद्धैर
साधारणैः औत्पत्तिकैर्नित्यैरणिमाद्यष्टैश्वर्ययुक्तं समगृणन् अस्तुवन् ॥ ४५ ॥

श्री॰ भाग॰ टी॰ ५५

तत्र तैर्दृष्टं देवमनुवर्णयति तं त्वागतं ते अचक्षत नापृथग्जनस्यापि चक्षुर्विषयं चमादि दसैव क्रियापदं स्वपुंभिः शोभितं प्रतिहृतं आ
नीतमौपयिकं ममातो वितं कृत्व पादुकादि यस्य कथंभूतं स्वसमाधिनाभाग्यं भजनीयं फलं यद्वस्यतं देवादि विष
यं हंसवत् श्रीर्ययोः तयोरुभयतः चलतोर्व्यजनयोः शिवोनुकूलो वायुः तेन लोलितः चलितः शुभ्रो यदातपत्रं तत्रैव
शशिमार्द्रयपातशशी तस्य केसराः मुक्ताहारविलंबाः ते भ्यो गलंति शीकरा यस्मिन् तेशीकरा अंबुकणाः ३८
कृत्स्नस्य द्वारपालसुनिर्हृदस्य प्रसादे संमुखस्य स्पृहणीयानां गणानां धाम स्थानं स्नेहावलोककलया प्रेमकटा

तं त्वागतं प्रतिहृतौपयिकं स्वपुंभिः तेऽचक्षताक्षविषयं स्वसमाधिभाग्यं ॥ हंसश्रियोर्व्यजनयोः शिव
वायुलोलच्छुभ्रातपत्रशशिकेसरशीकराम्बु ॥ ३८ ॥ कृत्स्नप्रसादसुमुखं स्पृहणीयधाम स्नेहावलो
ककलया हृदि संस्पृशन्तं ॥ श्यामे पृथावुरसि शोभितया श्रिया स्वः चूडामणिं सुभगयन्तमिवात्म
धिष्ण्यं ॥ ३९ ॥ पीतांशुके पृथुनितम्बिनि विस्फुरन्त्या काञ्च्यालिभिर्विरुतया वनमालया च ॥ वल्गुप्रको
ष्ठवलयं विनतासुतांसे ॥ विन्यस्तहस्तमितरेण धुनानमब्जं ॥ ४० ॥ विद्युत्क्षिपन्मकरकुण्डलमण्डनार्ह
गण्डस्थलोन्नसमुखं मणिमत्किरीटं ॥ दोर्दण्डषण्डविवरे हरता परार्ध्यहारेण कन्धरगतेन च कौस्तुभेन ॥ ४१ ॥

क्षेण हृदि संस्पृशन्तं स्वयं तु त्रैलोक्यविवरात्मके समस्तलोकपर्यंतः स्वर्गः तस्य चूडामणिवत् स्थितं स्वधिष्ण्यं वै
कुंठं एव सुभगयन्तं शोभयन्तं ॥ ३९ ॥ पृथुनितंबवत्या अयं तत्र विद्यते यस्य तस्मिन् पीतांशुके अलिभिर्नादितया व
नमालया च युक्तं सुभगं प्रकाशमानं पूर्वोक्ता वासेवैः वल्गुप्रकोष्ठे वलया नियस्य विन्यस्त एको हस्तो येन इ
तरेणान्येनाब्जं नालं भ्रामयंतं विन्यस्त इति पाठे च वलितं नत्वादि हस्ते सति विशेषणं ॥ ४० ॥ स्वकांत्या विद्युतः क्षिपं
तीये मकराकारे कुंडले तयोर्मंडनस्याहं गंडस्थलं यस्य तत् उन्नसमुखं यस्य मणिमुक्ते किरीटं यस्य दोर्दंडा
नां षंडः समूहः तस्य विवरे मध्ये स्थिते न हरता मनो हारेण विहरते तिवा परार्ध्य उत्कृष्टः तेन हारेणा कंधरायां स्थि

ह ३ स्कं
५५

न तस्मात्सुखवैकुंठेनायसमभूतम्भांगुवाभ्यांप्रकृष्टमहमेव कर्तेमिहास्मिन्नपराधे यत्कं तद्दीमहि चिंतयेमतदे।
वाकुः श्रृणुतरसभावः सन्नातरर्पानेनुक्तो वैकुंठलोकानन्तान्लोकान्नुवृजतेयत्र येषु लोके षु अस्मापापीयसो न
रुहुः इमेकामः क्रोधः लोभइतिगीतोक्ताः त्रयो विप्रवोभवंति पापीयसो लोकानिनिवा ॥ २४ ॥ इतितेषामीविते
भावत्ताहोरमनुधार्यतेचव्रलदंडवुद्धप्राप्रमनुधार्यतेचास्तुसमूहेरण्पुनिवार्यमनुधार्यहरेरजुवरोअतिका
नरााअतिकातर्याणाभयेनतस्मात्दगृहराणाकर्वनोसतोदेडवदापतेनाकथभूतस्महरेरापवभूतेभ्यामनिभ्यःता
भ्यामपिडरुग्रधिकाविभ्यतःयतःभयभावयतःअत्रकुर्वतः ॥ २५ ॥ अहो अपभोद्भमस्माभितिमेतुतप्यमानान्स।

महामसुखापरमस्यविकुंठभर्तः कार्तेप्रकृष्टमिहधीमहिमंदधीभ्यां लोकानितोव्रजतमेतस्भावह
ष्टापापीयसस्त्वयइमेतिपवोस्यवच ॥ २४ ॥ तेषामितीवितसुभामनुधार्यचोरतंत्रलदंडमनिवाराणाम
स्तूपवेः ॥ सयोहरेरनुचाराकुरुविभ्यतस्तत्पादयहावुपतनाम तिकातरेण ॥ २५ ॥ भूयादद्योनिभगावद्धि
रकास्दिडोयोनोहरेतस्वरहेलनमप्यशेषं ॥ मावोवृतापकलयाभगावतस्मृतिद्यो ॥ मोहोभवेदि
हतुनोव्रजतोरधाधः ॥ २८ ॥ एवंतदेवभगावानरविंदनाभः स्वानांविबुध्यसदतिक्रममार्यहृद्यः ॥
तस्मिन्ययोपरमहंसमहामुनीनां मन्वषणायचरणौ वलयन्स्मरूश्रीः ॥ २९ ॥

नकादीनप्रत्युवाच ॥ अर्थोसन्तुवतियउचितोदंडः सएवभगवद्भिरकारिनाचभवतामपराधःकश्चित्तत्रतोसो
नौआवयोः भूयावियोगमपिसरेहलनमीरूरवात्तिक्रमरूपेणापहरेत ॥ किंतयुष्माकंयुःकृपाविमितोवृता
पःतस्माद्यानतोआवयोः अधाधोमूढयोनीरपिव्रजतोःभगावत्स्मृतिद्यातकोमोहोमाभवेत ॥ किंतुमोहोपिस्म
तिमेवप्रवहतामितिप्रार्थना ॥ २८ ॥ एवं स्वानामरूक्तप्रतिकमेष्वपराधेनत्वाणामेवविबुध्यतस्मिन्यत्रतेरुद्धासे
देशोपिया आर्याणांहृद्यः मनोज्ञः चरणौवलयन्निति अयंभावः सच्चराणादर्शनप्रतिष्ठातजनकोधनीतोदर्पायनशामयि।

भागवत टीका तृतीयस्कंध पूर्वार्धे अ॰ १६ पत्र
स्कं॰ ३ अ॰ १६

हरेर्द्वारपालपतिभ्यां देवेषु पश्यत्सु सर्वार्थिमार्गास्ते मुनयः को वामिहेत्यादिश्लोकत्रयीमूचुः सरुष्टमनः श्रीहरि-
तस्य दिदृक्षितं दर्शनेच्छा तस्य भङ्गो यस्मिन्निमित्ते कामस्यानुजः क्रोधः तेन सहसा अकस्मादुपप्लुतानि क्षुभितान्यक्षी-
णि येषां ते तथा स्वर्हत्तमा अपि इति विषयानर्हत्वेन क्रोधानर्हत्वेनाहताः ॥ ३०॥ उच्चैर्महत्या भगवत्परिचर्यया
प्राप्य इह वैकुण्ठे निवसतां तद्धर्मिणां भगवद्धर्मिणां समदर्शिनां मध्ये वां युवयोरेव कोयं विषमः स्वभा-
वः केचित्स्वविपक्षा एके स्निग्धा इत्येवंभूतः स्वामिनो रत्नार्थं पक्षस्वभावो द्वारपालयोः युवयोर्भवतीति चेदत आह त-

ताभ्यां मिषत्स्वनिमिषेषु निषिध्यमानाः स्वर्हत्तमा अपि हरेः प्रतिहारपाभ्यां ॥ ऊचुः सुहृत्तम-
दिदृक्षितभङ्ग ईषत्कामानुजेन सहसा त उपप्लुताक्षाः ॥ ३१॥ मुनय ऊचुः ॥ को वामिहैत्य भगव-
त्परिचर्ययोच्चैस्तद्धर्मिणां निवसतां विषमः स्वभावः ॥ तस्मिन्प्रशान्तपुरुषे गतविग्रहे वां को
वात्मवत्कुहकयोः परिशङ्कनीयः ॥ ३२॥ न ह्यन्तरं भगवतीह समस्तकुक्षावात्मानमात्मनि
नभो नभसीव धीराः ॥ पश्यन्ति यत्र युवयोः सुरलिङ्गिनोः किं व्युत्पादितेऽह्युदरभेदि भयं यतोऽस्य

स्मिन्निति कुहकयोः आत्मवत्स्वदृष्टान्तेन यथा युवां कपटौ न तथान्योऽपि कश्चित्कपटः प्रवेक्ष्यतीत्यर्थभावः
न ह्यत्र भगवल्लोके विना कश्चिदागच्छति न वेश्वरे प्रशान्तत्वादविद्यमानविरोधे भयशङ्का अतो युवां केवलौ
धूर्ताविति ॥ ३२॥ भयशङ्काबीजं च भेदः स च कस्यापि कस्मिन्नास्तीत्याह नहीति समस्तं विश्वं कुक्षौ यस्य तस्मि-
न्निह भगवति धीरा विद्वांस आत्मनोऽन्तरं भेदं न पश्यन्ति ॥ किन्तु तस्मिन्परमात्मनि आत्मानमन्तर्भूतं पश्यन्ति महाकाशे घ-
टाकाशमिव तदा यथा अस्य राज्ञादेरुदरभेदि उदरभेदयुक्तं भयं भवति ॥ न तथा अस्य हरेर्नाह भयं ॥ यतः येन कार-

तस्मिन्निति षट्कक्षाः प्राकारद्वाराणि अप्रसज्जमानाः भगवद्दर्शनोत्कंठया तत्तदद्भुतदर्शनेप्यासक्तिं नकुर्वा-
णाः द्वारपालौ देवावपश्यन् समानं वयो वपुश्च ययोः गृहीता गदा याभ्यां परार्ध्यैः केयूरादिभिः विटंकः सुंदरो वेषो
ययोः २७ तावेव वर्णयति मत्तद्विरेफायमानतया वनमालया निवीतौ केवलं विनाप्यलंकृतौ असितानी-
लानि चतुष्टये च ते संयोक्ता बाहवः तेषां मध्ये विमलतया वक्त्रं च मनाक् रभसं किंचित् क्रुद्धं दधानौ स्फुटा उ-
न्मलौ निर्गतौ श्वाससमार्गौ नासापुटौ ताभ्यां २८ एतयोर्मिषतोः पश्यतोः तावनादृत्यापृष्ट्वा यथा पूर्वाः प्र

तस्मिन्नतीत्य मुनयः षडसज्जमानाः कक्षाः समानवयसावथ सप्तमायां देवावचक्षत गृही-
तगदौ परार्ध्यकेयूरकुंडलकिरीटविटंकवेषौ २७ मत्तद्विरेफवनमालिकयानिवीतौ वि-
न्यस्तयासितचतुष्टयबाहुमध्ये वक्त्रं भ्रुवाकुटिलयास्फुटनिर्गमाभ्यां रक्तेक्षणेनचमनाग्र-
भसंदधानौ २८ द्वार्येतयोर्निविविशुर्मिषतोरपृष्ट्वा पूर्वायथापुरटवज्रकपाटिकायाः
सर्वत्र ते विषमयामुनयः स्वदृष्ट्या येसंचरंत्यविहताविगताभिशंकाः २९ तान्वीक्ष्यवातरशना-
ंश्चतुरः कुमारान् वृद्धान्दशार्धवयसोविदितात्मतत्वान् वेत्रेणचास्खलयतामतदर्ह-
णांस्तौ तेजोविहस्यभगवत्प्रतिकूलशीलौ ३० ॥

द्वारः पुरटो हेम तद्वज्रमय्यः कपाटिका यासु ताः यथा विविशुस्तथा सप्तमायामपि द्वारि ते विविशुः
अप्रवेशहेतुः सर्वत्र ते अविहता अनिवारिताः निःशंकत्वे हेतुः अविषमया समया स्वदृष्ट्येति २९ वातरशनान् नग्-
नान् वृद्धानपि पंचवर्षबालकवत् प्रतीयमानान् नयंकारादन्यथा वयं स्वलयतां निवारितवंतौ नत तत्त्व-
बलं न मर्हंतीति तथा तान् अहो अस्मानपि धार्ष्ट्यमिति स्वं तेजो विहस्य भगवत्प्रतिकूलं

श्री॰
भाग॰
टी॰
५२

प्रसंगात्तामयाचतिनोत्साभिर्दृश्यादिभिरपि प्रत्यर्थितां न्यगातिंप्रपन्नाः प्राप्ताः संतोपि ह्येवायाधनं न कुर्वंति
कीदृशीं न्यगातिं यत्र यस्मात् धर्मसहितं तत्त्वज्ञानं भवति तद्भुमयसाधकत्वात्तस्याः तेसुप्रभवावतोवितन
यासायया न नुसंमोहिता वर्तते तिविदं यदि वेवं संबंधः केवलं न एव न व्रजंति किंतु ये भावदाराधनं न
कुर्वंति तेपि तु यामायाविमोहितत्वादिति २४ पुनः कथंभूतं यच्चनः उपरिस्थितं व्रजंति किं तु ये भाव
दारायनं न कुर्वंति तेपि तेषां मायाविमोहितत्वादिति २४ पुनः कथंभूतं यच्चनः उपरिस्थितं व्रजंति

ये भ्यर्थितामपि च नो न्यगातिं प्रपन्ना ज्ञानं च तत्त्वविषयं सहधर्म यत्र नाराधनं भगवतो वितरंत्य
मुष्य संमोहिता विततया वत मायया ते २४ यच्च व्रजंत्यनिमिषामृषभानुवृत्त्या दूरेयमा
ह्युपरि नः स्पृहणीयशीलाः भर्तुर्मिथः सुयशसः कथनानुरागवैक्लव्यबाष्पकलया पुल
कीकृतांगाः २५ तद्धिस्वयं ग्रथितभुवनैकवंद्यं द्युम्नं विचित्रविबुधाग्र्यविमानशोचिः
आप्रोपरां मुदमपूर्वमुपेत्य योगमायाबलेन मुनयस्तदथो विकुंठम् २६ ॥ राम ॥

प्रतिमिषां देवानां नृषभः श्रेष्ठो हरिः तस्यानुवृत्त्याहवेव्येनां रक्षायत्त दूरीकृतयमनियमाः यावांतरे दूरीकृ
ताहंकारः इत्यर्थः स्पृहणीयं करुणादि शीलं येषां किं च भर्तुर्हरेर्यत्सुयशः तस्य मिथः कथनेनानुरागः
तेनैव वैक्लव्यं तेन बाष्पकला तया पुलकीकृतमंगं येषां यद्वा तेउपरि व्रजंतो विशेषणानि दूरे अहंकारत्वा
दस्माकं तेषामधिकारो यद्व्रजंतीत्यर्थः २५ तत्सदा पूर्वं विकुंठं व्रजंति तंउपेत्य मुनयः परां मुदं हृष्टास्तद्वसा
पूः अपूर्वं तत्र हेतवः विचित्राः रुणा हरिणाग्रथितं ग्रथितं भुवनानामेकमेव वंद्यं द्युम्नमलौकिकं विचित्रा

विबुधाग्र्याणां विमानानां तेषां शोचिर्दीप्तिर्यस्मिन् योगमायाबलेनेति श्री
...णागयोगप्रभावेणोपेत्य परमेश्वरेतयोगमायेति चिद्विलास इति
इत्यर्थः ॥२५॥

श्रीः लक्ष्मीः रूपिणीमनोहरमूर्त्तिर्भाविनीसतीश्रीहरेः समानिसमार्जनं कुर्वतीयस्मिंल्लोके संलक्ष्यते चर
णारविंदक्रमायतीरूपेणाश्रारुंधतीतिक्रमोदोषः चांचलस्य याश्वरासुकेनदोषाप्रसारितिनवाहुनाको
रत्नासमनिस्फटिकमेयानिजरूपा नियस्मिन्नप्रवशोभार्णवंपतेस्यप्रकेहेमयस्मिन्नयस्याप्रत्युग्रहणोश्रीर
नुग्रहैकवशाद्दर्पणमयेषाश्रुसादीनोयत्नः साप्रयेभावः यद्यपितवरंजानासेवनयापिस्वर्णापिर्कः
क्लिन्नमिश्रिभमाश्रवङ्घाषतिविविलासलीलीलानुजेवप्रसयतीविनयभक्तिर्भावनयालत्वयतेइति २१ ग्र
गाहदेवाः यद्यस्मिंल्लोके श्रीरेवंप्रमतमप्रमेसलमेते किंकुर्वतीविद्रुममयानितटानियासांग्रमलाग्रस्वनते

श्रीरूपिणीक्रमायतीचरणारविंदंलीलांबुजेनहृविसर्पनिस्तुक्रदोषा ॥ संलक्ष्यतेस्फटिकरूप
रूपतहेस्मिसमार्जतीवयदनुग्रहणोन्मुखतः ॥ २१ ॥ वापीषुविद्रुमतटासुमलाम्मतास्वपेषा ॥
न्विता निजवनेतलसीभिरीशा प्रभ्यचेती स्वलकामनसमीनवक्रमुकेषितभयावलेस्मसनोग
यस्रीः ॥ २२ ॥ यन्नवु जेमयमिदोरवनानुवादात ॥ शृण्वतियन्नविषयाउकथामतिस्रीः या
स्त्यक्तनाहतमभेरुर्मिराततसामसांलानृत्यिपमयशारणाप्रुतमस्तहेत ॥ २३ ॥

स्माश्रापोयासांतासुवापीषुनिजयनेलसीवनेपरिचारकाभिरन्विता तलसीभिः श्रीविष्णुमर्चयंतीतिन
दाउदकेप्रतिविवितंष्या मसानालकेयुक्तेउत्तरहनासिकायुक्तंबकेवीसभयावनाउ क्रो वितेवुविनवित
मराननु ॥ अन्नतलत्याश्रापिसाभाग्यसत्त्वंभगारुदनुग्रहणेलवविद्यानिने ॥ २२ ॥ पुनः कथंभूतनन्दयदे
कुटेनवूजतिकेयेकु कथाः श्रुणुवतिकाः भाग्वभिसनीनिन्नूयाभितत्स्यहरेरचनाद्रुमादिलीला
लसायानुवादादन्याविषयाः ॥ श्रथकामादिवार्त्ताःभानिभ्रशिकाःतेषामगुजनेहेतुः यालुहरन्ना
णे मेरेः ष्क्रमाः सम्यस्तां सानयानयावणोपुनवास्युयेषुनमस्तनरकेपुदिपतिहृतस्वेदेकथंभूतः श्रान्तः सा

श्री·
भाग·
टी·
५५

त्वद्गुणोपवर्णनमेव स्वरत्वेन स्तुवंतः प्रार्थयंते दृष्ट्वेति सतमि लोकनाथानां श्रिया ग्रामणी भाव विदमि प्राय जोमि केनासि
अमनृता: कोकिला: दामूहा: चातका: अविरमा अविरमतिअनेनतत्र रूपलिणामपिहृविकथा अवणा दिपरमात्मा
दादम्पिता: ॥१७॥ मंदारपारिजातौ स्तवनरु विशेषो कुरवरत्तिलकवृतु ॥ उत्पलं राजिविकासि नागो नागकेसर: ए
ता: स्मृतिः ॥ अनेनतत्र प्रागणा ग्राह्मिाए वनमत्सविणाइमुकोएवभूतवनेयत्रतेकुंठंयग्रुविविषूर्वीणान्वय: ॥१९॥
नसः पुष्पजातयः सगंधाअपितुलसिका भरणेन श्रीहरिणा न लसणा गंधेर्चिंतेसतियस्मिन्नेनेन स्मालयाबहुमान
य

पारावतान्यभृतसारसचक्रवाकदात्यूहहंसशुकतित्तिरिबर्हिणां यः ॥ कोलाहलो विरमते विरमात्र
मुच्चैर्भृंगाधिपेहरिकथामिवगायमाने ॥१८॥ मंदारकुंदकुरबोत्पलचंपकार्णपुन्नागनागबकुला
म्बुजपारिजाताः ॥ गंधेर्चितेतुलसिकाभरणेन तस्या ॥ यस्मिंस्तपः सुमनसो बहु मानयंति ॥१९॥
तत्संकुलंहरिपदानतिमात्रदृष्टैः ॥ वैदूर्यमारकतहेममयैर्विमानैः ॥ येषां बृहत्कटितटाः स्मिता
शोभिमुख्यः कृष्णात्मनां न रज आदधुरुत्स्मयाद्यैः ॥ २०

पुनर्वैकुंठमेव विशिनष्टि तत्संकुलमाभवतिकुं ईरिपदयो यानतिः प्रणामः तावन्मात्रेण दृष्टैर्भक्तानां
विमानैः नकर्मादिप्राप्यैः वैदूर्यमारकतहेममयैः स्वविमानैः बृहतिकटितटा तियासां स्मितशोभीति
मुखानियासां ता अपि कृष्णआत्मा येषां रज: काममुत्स्मयाद्यैः परिहासादिभिः नआदधुर्जनयामासुः
राम ॥ २० ॥ ॥ २१ राम ॥ राम ॥ राम ॥ राम ५२

आपत्कारणमाहुः एषगर्भः तस्य विशेषाणां अर्पितं विवि संकाश्यपसोमोवीर्यं दिशान्ति मिरयं कल्मोपमाः अर्व
नु ॥१०॥ दितेः कुचेष्टितं तस्या नाप्रह्लस्य देवानां येषां हा विज्ञमिवाकुनितेषां गोचरो विषयभूतः प्रशमभागव ॥११॥ तु
ष्टात्मकाघात्सर्वजातः ॥१२॥ वैकुंठाख्यलोकं ॥१३॥ तं वर्णयति वसन्तीत्यादि द्वादशभिः वैकुंठस्य हरे विवमूर्ति
र्येषां ते निमित्तफलेन निमित्तप्रवर्तकं यस्मिन् निष्कामेन धर्मेणाराधयन्तः आराधितवंतः ॥१४॥ सान्द्रा

एष देव दितेर्गर्भो जः काश्यपमर्पितं । दिशास्तिमिरयन्सर्वा वर्धते ग्निरिवैधसि ॥१०॥ मैत्रेय उवाच स प्रह
स्य महाबाहो भगवाञ्छब्दगोचरः । प्रत्याचष्टात्मभूर्देवान्प्रीणन्रुचिरया गिरा ॥११॥ ब्रह्मोवाच मानसा
मे सुता युष्मत्पूर्वजाः सनकादयः । चेरुर्विहायसा लोकाल्लोकेषु विगतस्पृहाः ॥१२॥ त एकदा भगव
तो वैकुंठस्यामलात्मनः । ययुर्वैकुंठनिलयं सर्वलोकनमस्कृतं ॥१३॥ वसन्ति यत्र पुरुषाः सर्वे वैकुं
ठमूर्तयः । येऽनिमित्तनिमित्तेन धर्मेणाराधयन्हरिं ॥१४॥ यत्र चाद्यः पुमानास्ते भगवाञ्छब्दगोचरः । स
त्त्वं विष्टभ्य विरजं स्वानां नो मृडयन्वृषः ॥१५॥ यत्र नैःश्रेयसं नाम वनं कामदुघैर्द्रुमैः । सर्वर्तुश्रीभि
र्विभ्राजत्कैवल्यमिव मूर्तिमत् ॥१६॥ वैमानिकाः सललना यत्र गायन्ति लोकशमलक्षपणा
नि भर्तुः । अन्तर्जलेऽनुविकसन्मधुमाधवीनां गन्धेन खण्डितधियोऽप्यनिलं क्षिपन्तः ॥१७॥ २ नाम

घरः वेदान्तैकवेद्यः विरजं सत्त्वं मूर्तिं विष्टभ्य स्वानां नो वृषः धर्ममूर्तिः स्वानांस्वानां ॥१५॥ तत्र तत्र वनं विशिनष्टि यत्रेति
त्रिभिः सर्वर्तुश्रीभिः सर्वर्तुषु या श्रीः संपत् तया ॥१६॥ चरितानि विचित्राणि भर्तुः प्रभोः अंतर्विकसत् मधुमाधवी मधुमकरंदः तयुक्ता
माधवी वासंती लता यद्वा अंतर्विकसन्मधुकराः प्रसवस्तबकवंतः माधव्यः मधुकालीनाः सुमनसः तासां
गंधेन खंडिता विक्षिप्ता धीर्येषां ते पितं द्रुथ्याप कमनिलं क्षिपंतः तिरस्कुर्वंतो गायंति अत्र नैश्वगाव मार्यादानां निरति

श्री भाग. टी. ५१

ब्रह्माणं परमेष्ठित्वेन स्तुवन्तः प्रार्थयन्ते देवदेवेति सप्तभिः लोकनाथानां शिखामणे भावविदभिप्रायज्ञोऽसि
केनाभिप्रायेणागता इति तद्भावं वर्णयन्ति त्वन्नानासीत्यर्थः ॥४॥ विज्ञानं वीर्यं बलं यस्य तस्मै इदं ब्रह्माण्डदेहरूपं उपेयुषे प्राप्तवते गृही
तगुणभेदाय रजोगुणाय अव्यक्तं प्रपंचस्य योनये कारणाय अव्यक्ताय केनाप्यप्रमाणेन ज्ञाता योनिर्यस्येति।
वा ॥५॥ सकामतया प्रतिकूलानां तु एवमनुभवेनानिष्कामभक्ताः स्तुवन्त आहुर्द्वाभ्यां ये त्वेति अनन्येन निष्कामेन।
भावेन भक्त्या ध्यायन्ति आत्मनो जीवान् भावयतीति तथा त्वयि प्रोतानि ग्रथितानि भुवनानि येन चेतनावेन।

देवदेव जगद्धातर्लोकनाथशिखामणे । परेषामपरेषां त्वं भूतानामसि भाववित् ॥४॥ नमो विज्ञान
वीर्याय माययेदमुपेयुषे । गृहीतगुणभेदाय नमस्तेऽव्यक्तयोनये ॥५॥ ये त्वनन्येन भावेन भावयन्त्यात्म ध्यं॰
भावनं । आत्मनि प्रोतभुवनं परं सदसदात्मकं ॥६॥ तेषां सुपक्वयोगानां जितश्वासेन्द्रियात्मनां ।
लब्धयुष्मत्प्रसादानां न कुतश्चित्पराभवः ॥७॥ यस्य वाचा प्रजाः सर्वा गावस्तन्त्येव यन्त्रिताः । हरन्ति
बलिमायत्तास्तस्मै मुख्याय ते नमः ॥८॥ स त्वं विधत्स्व शं भूमंस्तमसा लुप्तकर्मणां । अदभ्रदय
याऽदृष्ट्या आपन्नानर्हसीक्षितुं ॥९॥ २ ॥

न प्रपंचकारणमित्यर्थः तत्र हेतुः सदसदात्मकं प्रपंचं कार्यकारणरूपं परं तस्मात् परं ॥६॥ जितः श्वा
सः इन्द्रियाणि च मनश्च यैः यतः सुपक्वयोगाः अत एव प्राप्तो युष्मत्प्रसादो यैः तेषां ॥७॥ ब्रह्मेतु नित्यकर्मभिः के
वलं इत्याहुः यस्येति तन्त्यां दाम्नि प्राप्ताः अधीनाः मुख्याय तिर्यगादिप्राणिरूपायेति वा । तथा च श्रुतिः तस्या
वाकृति नामानि रूपाणि इत्यादि ॥८॥ तमसा होरात्रविभागाभावेन लुप्तानि कर्माणि येषां तान् आपन्नान् आपद्गतान्

३ [illegible] ५१

महाभागवतत्वमाह ॥ अलंपट इति ॥ शीलधरः सुस्वभावः गुणानां धैर्यादीनामाकरोऽन्नम्भि(?)ः परेषां समृद्ध्या
हृष्टः परेषु दुःखितेषु सत्सु दुःखितः न भूतो न जातः शत्रुर्यस्य निदाघे तापं चन्द्रो यथा हरति एवं जगतः शोकं
हरिष्यति ॥ ४८ ॥ अपि च किं बहु स्तौमि तस्मादान्तरं विति स्वपुरुषाणामिच्छया पुनः पुनर्गृहीतानि रूपाणि येन
श्रीरेव ललना तस्या ईदृशी चेत् सा ललामं मेडनं द्रष्टा इत्यादि ॥ ४९ ॥ महामनः सोऽन्मादविना द(?)विना तस्य पुत्रेण मर

अलम्पटः शीलधरो गुणाकरो हृष्टः परर्द्ध्या व्यथितो दुःखितेषु ॥ अभूतशत्रुर्जगतः शोकहर्ता नै
दाघिकं तापमिवोडुराजः ॥ ४८ ॥ अन्तर्बहिश्चामलमब्जनेत्रं स्वपूरुषेच्छानुगृहीतरूपं ॥ पौत्रस्तव श्रीलल
नाललामं द्रष्टा स्फुरत्कुण्डलमण्डिताननं ॥ ४९ ॥ मैत्रेय उवाच ॥ श्रुत्वा भागवतं पौत्रममोदत दितिर्भृ
शं ॥ पुत्रयोश्च वधं कृष्णाद्विदित्वासीन्महामनाः ॥ ५० ॥ इति श्रीभागवते तृतीयस्कंधे चतुर्दशोऽध्यायः ॥ १४
मैत्रेय उवाच ॥ प्राजापत्यं तु तत्तेजः परतेजोहनं दितिः ॥ दधार वर्षाणि शतं शंकमाना सुरार्दनात् ॥ १
लोके तेन हतालोके लोकपाला हतौजसः ॥ न्यवेदयन्विश्वसृजे ध्वान्तव्यतिकरं दिशां ॥ २ ॥ तम एतद्वि
भो वेत्थ संविग्ना यद्वयं भृशं ॥ न ह्यव्यक्तं भगवतः कालेनास्पृष्टवर्त्मनः ॥ ३ ॥ २

णो पुत्रयोः कीर्तिः सङ्कृतिस्तु भवेदिति सर्वः ॥ ५० ॥ इति श्रीभावार्थे तृतीयस्कंधे चतुर्दशः ॥ १४ ॥ हतप्रभैः सुरैः स्रष्टुः
प्राह पंचदशो विधिः ॥ तद्बीजे विप्रशापादि वैकुंठे विलुभृत्ययोः ॥ तदेवं देवानां ब्रह्मणा सह संवादप्रस्तावमुक्तेद्रा
नीं सैवादिं वक्तुमाह ॥ प्राजापत्यं कश्यपतेजो वीर्यं परेषां तेजो हन्तीति तथा आर्षः स्वपुत्राभ्यां करिष्यते यत्सुराणां
मर्दनं पीडनं तस्माच्छंकमाना ॥ १ ॥ तेन गर्भतेजसा हतालोके निरस्तसूर्यादिप्रकाशो हतौजसः हतप्रभावाः ध्वा
तेन व्यतिकरं संकरं ॥ २ ॥ भावेऽस्य जानासि किं विज्ञापयामि यतः वयं संविग्ना भीताः अव्यक्ते अज्ञातानेन स्पृष्टवर्त्मनः

भा. टी. त्रि. ५४

श्री॰
भा॰
टी॰
५०

हन्यमानानां ॥ ४९ ॥ न्यालपर्वन्यूहद्युत्पद्यवंड्ः ॥ ५० ॥ स्वनाभेनोदभावहर्यस्यमस्यं मम कोपि तेष्वित्युक्तत्वात् ॥ श्री
कि तु चिन्तासती प्रार्थयते आस्यं तात्नाभूदिति ॥ ५८ ॥ नाऽस्काऽप्यपि तथा योयोनिं सगरा नाभवति तत्रस्याऽस्नाद
गृह्णाति रूपं न कुर्वंति ॥ ५९ ॥ कृतोऽयोपायः तेन शोकः ततोऽनुतापः तेन प्रत्यवमर्शनात् ॥ पुत्रकाम्युक्ताविचार
णात् ॥ भवावतिहृदयो भवे प्रीतह ॥ ६२ ॥ एतैः पंचभिः कारणैः पुत्रस्य हि वाणप कापि पोः प्रजानामध्येकः सतो

प्राणिनां हन्यमानानां दीनानामकृतागसां ॥ स्त्रीणां निगृह्यमाणानां कोपितेषु महात्मसु ॥ ४९ ॥ तदा
विश्वस्य वः क्रुद्धो भगवांल्लोकभावनः ॥ इति ब्रुवती यासोयथा दीनपात पर्व शृहस ॥ ५० ॥ दितिरुवाच
वधं भगवतासाक्षात् सुनाभोदारबाहुना ॥ आशासे पुत्रयोर्मह्यं मा क्रुद्धाद् ब्राह्मणात् प्रभो ॥ ५१ ॥ न ब्रह्मदण्ड
दग्धस्य न भूतभयदस्य च ॥ नारकाश्चानुगृह्णन्ति यांयां योनिमसौ गतः ॥ ५२ ॥ कश्यप उवाच ॥ कृतशो
कानुतापेन सद्यः प्रत्यवमर्शनात् ॥ भगवत्युरुमानाच्च भवे मय्यपि चादरात् ॥ ५३ ॥ पुत्रस्यैव च पुत्राणां
भवितैकः सतां मतः ॥ गास्यंति यद्यशः शुद्धं भगवद्यशसा समं ॥ ५४ ॥ योगैर्हेमेव दुर्वर्णं भावयिष्य
तिसाधवः ॥ निर्वैरादिभिरात्मानं यच्छीलमनुवर्तितुं ॥ ५५ ॥ यत्प्रसादादिदं विश्वं प्रसीदति यदात्म
कं ॥ स स्वदृग्भगवान्यस्य तोष्यतेऽनन्यया दृशा ॥ ५६ ॥ स वै महाभागवतो महात्मा महानुभावो महतां म

मनो भविष्यति ॥ तमेव वर्णयति ॥ गास्यंतीति ॥ सार्धैः पंचभिः सम्यं सहृदयं वा ॥ ५४ ॥ दीनवर्णं हि मयथा योगैर्दा
हादिभिरुपायैः शोधयंते यथा तस्य शीलस्वभावमनुवर्तितुं प्रवर्तितं साधुनिर्वैरादिभिः योगैरात्मानं भावयिष्यं
ति ॥ शोधयिष्यंति ॥ ५५ ॥ विश्वप्रसादहेतुः यदात्मकं स्वदृक्स्वात्मसाक्षी ॥ यस्यानन्यया भगवानेव समसत्त्वदृ
नयादृशा तोष्यते नान्यं प्रार्थयते ॥ ५६ ॥ हेतुः स वै इति महात्मा परिशिष्टः महानुभावो महाप्रभावः महतामपि म

उपस्पृश्य स्नात्वा भार्यायाह्वानो विरजं ज्योतिर्ध्यायन् सनातनं ब्रह्म गायत्रीं प्रणवं वा जजाप ॥३२॥ कर्मावद्येन कर्मदो
षेण ॥३३॥ नावधीत् मा हन्त्वित्यर्थः ॥ वधशंकाबीजमाह ॥ रुद्र इति ॥ अंहसमंहोऽपराधमकरवं न त्वमसि
रुद्रः स्वतन्त्रो वधयतीति ॥ रुद्रं स्तौति ॥ उग्राय अनतिलेच्छाय मीढुषे सकामेभ्यः फलसेचकाय निष्कामेभ्यः शिवाय
यवस्तुनो न्यस्तदंडाय दुष्टेषु धृतदंडाय संहारे मन्यवे ॥३५॥ भामो भगिनीभर्ता उरुरनुग्रहो यस्य विदयस्या

अथोपस्पृश्य सलिलं प्राणानायम्य वाग्यतः ध्यायन् जजाप विरजं ब्रह्म ज्योतिः सनातनं ॥३२॥ दिति
स्तु व्रीडिता तेन कर्मावद्येन भारत ॥ उपसंगम्य विप्रर्षिमधोमुख्यभ्यभाषत ॥३३॥ दितिरुवाच न मे
गर्भमिमं ब्रह्मन् भूतानामृषभोऽवधीत् ॥ रुद्रः पतिर्हि भूतानां यस्याकरवमंहसं ॥३४॥ नमो रुद्राय
महते देवायोग्राय मीढुषे ॥ शिवाय न्यस्तदंडाय धृतदंडाय मन्यवे ॥३५॥ स नः प्रसीदतां भामो
भगवानुर्व्वनुग्रहः ॥ व्याधस्याप्यनुकंप्यानां स्त्रीणां देवः सतीपतिः ॥३६॥ मैत्रेय उवाच ॥ स्वसर्ग
स्याशिषं लोक्यामाशासानां प्रवेपतीं ॥ निवृत्तसंध्यानियमो भार्यामाह प्रजापतिः ॥३७॥ कश्यप
उवाच ॥ अप्रायत्यादात्मनस्ते दोषान्मौहूर्त्तिकादुत ॥ मन्निदेशातिचारेण देवानां चैव हेलनात् ॥ २
भविष्यतस्तवाभद्रे जठरे अवधमौ ॥ लोकान् सपालांस्त्रींश्चंडि मुहुराक्रंदयिष्यतः ॥३९॥ २

पि सतीपतित्वेन स्त्रीणां प्रभावं स्वयमपि वेत्तीति सूचयति ॥३६॥ स्वसर्गस्य स्वसंतानस्याशिषं शुभां
लोक्यां लोकद्वयार्हां संध्यायां योनिषेधः स निवृत्तो यस्य ॥३७॥ ते आत्मनः चित्तस्याप्रायत्यादशुचित्वा
त् ॥ मौहूर्तिकत्वात् संध्याकालात् ॥ उ नापि मन्निदेशस्याज्ञाया अतिचारेण अतिक्रमात् देवानां रुद्रा
नुचराणां ॥३८॥ पनेयुतस्मिन् कुक्षिः जठराधमौ ॥ प्रजापश्चादाह चंडिकोपने ॥३९॥ याम

ननु तथापि महत्वेनादरणीयस्य स्वजनस्य यत्नवत्त्वं स्त्रीसेवितमेव । तत्राह यस्य स्वजनेनादिनास्तिसमत्वादीश्वरस्य । ऐश्व
र्येणागमाह येन च वर्णापविद्धा निर्माल्यवहूवतः स्यक्तेनात्तेन भुक्तभोगा नर्जामायां लग्नयी विभूतिं महाप्रसादा । इत्याशा
सहे व्रतैस्तु माराध्य ॥ २५ ॥ अनिषिद्धसुखमांगादसौ पिशाचरूपधारो न कार्यं इत्याह हास्यो । यस्मान्न वयं विषया
सक्ति हैवतैस्तु माराध्य स्तुत्य माचरितं विभिन्नस्व भेत्तुमिच्छव ॥ २६ ॥ समीहितमभिप्रेतं लोकशिवाद्रूपं । अविद्बुषो

न यस्य लोके स्वजनः परो वा नात्यादृतो नोत कश्चिद्विगर्ह्यः ॥ वयं व्रतैर्यच्चरणापविद्धामाशास्महे जग्धं वनत्रु
क्तभोगा ॥ २७ ॥ यस्मान्न वयाच विततमनोषिणो गुणीत्या विधापटलेविभिन्नव ॥ निरस्तसाम्यातिशयो पिय
त्स्वयं ॥ पिशाचचर्यामचरद्गतिः सतां ॥ २८ ॥ हसंति यस्याचरितं हि दुर्भगाः स्वात्मन्यवतस्याविदुषः समीहि ।
तं ॥ यैर्वस्त्रमाल्याभरणानुलेपनैः सुभोजनैः स्वात्मतयोपलालितं ॥ २४ ॥ प्रसादयोयत्कृतमेत्वपालायत्का
रणं विश्वमिदं च माया ॥ आज्ञाकरीतस्य पिशाचचर्या अहो विभूम्नश्चरितं विडंबनं ॥ २८ ॥ मैत्रेय उवाच ॥ ए
वं संविदितो भर्त्तामितन्मयो न्मथोन्मथितेंद्रिया ॥ जहौ वरा सौ ब्रह्मर्षि घस्रे व गतत्रपा ॥ २९ ॥ संविदित्वा
स्वभार्यायातं निर्बंधविकर्मणि ॥ नत्वाद्रष्टाय रहसि तया योप विवेशाह ॥ ३० ॥ ॥ राम ॥ ॥ राम ॥ ॥

गृह

विद्वांसः ॥ यज्ज्ञानविद्यास्यत्वादितिनस्य सर्वज्ञस्येसर्थः ॥ दुर्भगानेवाह ॥ यैरितिसुभोजनं भुक्तं भोजं शरीरं स्वात्म
तया ॥ यमेवात्मेतिबुद्ध्या ॥ २४ ॥ ग्रहो ग्रहनर्कान्तिसाचरणोऽस्याह ॥ प्रसादयोयेन कृतानात्मत्वाधिकारास्यालयेति ॥ यः
कारणाय स्येन कृतइदं विश्वं माया यायस्याज्ञाकारी विभूम्नः ॥ श्री परमेश्वरस्य विडंबनं मतर्कामित्यर्थः ॥ २८ ॥ भ
र्त्तामितिरूपकेणाव मे विदिते ज्ञापिते ज्ञापिते पितिरृघस्लेवशाच ॥ २५ ॥ विकर्मणि निषिद्धे ॥ अद्रष्टाय ॥ देवहूत्याये स्त

स्वधुर्वेरस्त्वादृस्कर्मभारंविक्तुरोनिश्चितः हेलाभिर्लीलाभिर्जयेमेतिसभार्यसेंद्रियाणिप्राप्येणाननस्ततोनस्पर्पति
इति १९ तांत्वामनेकोपकारकश्रीप्रत्युपकारैःत्वत्सदृशीभवितुंनप्रभवोनसमर्थाः येचान्येगुणागृध्नवःगुणाभि
याःस्तएनसमर्थाः संपूर्णेनाप्यायुषावाशाहाजन्मांतरेरपिनप्रभवइत्युक्तं २० यद्यपित्वदनुकरणासमर्थाश्र
जातमेगुणयमेनातिवोचेतिननिंदति प्रतिपालयप्रतीक्षस्व २१ निदाघमरणायंतोम भीषयन् श्रीमहारुद्रम्।

यामाश्रितोंद्रियारातीन्दुर्जयानितराश्रमैः वयंजयेमहेलाभिर्दस्यूनुर्गपतिर्यथा १९ नवयंप्रभवःतां
त्वामनुकर्तुंगृहेश्वरि अप्यायुषावाकार्त्स्न्येनयेचान्येगुणगृध्नवः २० अथापिकाममेतंतेप्रजात्यैक
लं रवाण्यहं यथामांनातिरोचंतिमुहूर्तंप्रतिपालय २१ एषाघोरतमावेलाघोराणांघोरदर्शना चरं
तियस्यांभूतानिभूतेशानुचराणिह २२ एतस्यांसाध्विसंध्यायांभगवान्भूतभावनः प
रीतोभूतपार्षदैर्द्विर्वृषेणाटतिभूतराट् २३ श्मशानचक्रानिलधूलिधूम्रविकी
र्णविद्योतजटाकलापः भस्मावगुंठामलरुक्मदेहो देवस्त्रिभिःपश्यति
देवरस्ते २४

नुवर्णयति एषेतित्रिभिः घोराणांमेघावेलास्वयंचघोरदर्शना २२ भूतान्यत्रतेपार्षदोभूतगणोस्तर्हिता
तेनसुखामात्रेवर्जनीयमितितिचेतत्राह २३ श्मशानेयःचक्रानिलोवातमंडलीतस्मिन्याधूलिस्तयाधूम्राविकी
र्णाविलिमः विद्योतमानाप्रुतिमानजटाकलापोयस्यभस्मनावगुंठः भस्मप्रावृतः अमलोरुक्मवद्देहोयस्य
सदेवःत्रिभिः सोमार्काग्निनेत्रैःपश्यतीत्यनुसंधानेवहूक्तत्वयेणानुषंगः एकस्यजामातरः परस्परंभ्राता
रोद्रवशुरियंते अतोममभ्राताप्तोनदेवरइत्युक्तं २४ २॥ राम

कृपणां बहुभाषिणीमिति वक्ष्यति। एषमामिति ह्रस्वां कामार्तां भर्तारं नियतं विज्ञवद्भाषणं वार्यते दुनोति पी
डयति दुःखं उत्तापयति विक्रम्य शौर्यमाविर्भाव्य रम्भां कदलीं ९ आयुङ्क्तां सर्वतः पुनः कुरु गणक कर्मणा। १० भर्तरि आ
प्तमानानां स्त्रीणां आविशते यशः। यासां पतिः प्रजया पुत्ररूपेण तज्जाया भवति। यदस्यां जायते पुनरिति श्रुतिः ११ नोऽस्मा
कं पिता नोऽस्मान् पृथक् पृष्टवानिदं कं वृणीत इति भावः। त्रयोदशानामस्माकं त्वयि भावः साम्यं विषयस्य वरणं तद्वा अनुविनमि

दितिरुवाच। एषमां त्वत्कृते विद्वन् कामआत्तशरासनः। दुनोति दीनां विक्रम्य रम्भामिव मतङ्गजः॥ ९
तद्भवान् दह्यमानायां सपत्नीनां समृद्धिभिः। प्रजावतीनां भद्रं ते मय्यायुङ्क्तामनुग्रहम्॥ १० भर्तर्याप्तोरु
मानानां लोकानाविशते यशः। पतिर्भवद्विधो यासां प्रजया ननु जायते॥ ११ पुरा पिता नो भगवान्
दक्षो दुहितृवत्सलः। कं वृणीत वरं वत्सा इत्यपृच्छत नः पृथक्॥ १२ स विदित्वात्मजानां नो भावं सं
तानभावनः। त्रयोदशाददात्तासां यास्ते शीलमनुव्रताः॥ १३ अथ मे कुरु कल्याण कामं कञ्जवि
लोचन। आर्तोपसर्पणं भूमन्नमोघं हि महीयसि॥ १४ इति तां वीर मारीचः कृपणां बहुभाषिणीम्। प्र
त्याहानुनयन् वाचा प्रवृद्धानङ्गकश्मलाम्॥ १५ एष तेऽहं विधास्यामि प्रियं भीरु यदिच्छसि। तस्याः कामं न
कः कुर्यात्सिद्धिस्त्रैवर्गिकी यतः॥ १६ सर्वाश्रमानुपादाय स्वाश्रमेण कलत्रवान्। व्यसनार्णवम
त्येति जलयानैर्यथार्णवम्॥ यामाहुरात्मनो ह्यर्धं श्रेयस्कामस्य मानिनि। यस्यां स्वधुरमध्यस्य पुमांश्च

ति १३ आर्तोपसर्पणं भवादृशे महीयसि महत्तमे १३। १४ प्रवृद्धानङ्गेन कश्मलं मोहो यस्यास्तां १५ संध्या
कालवेलायां भार्या श्रेयसा एषं इति पञ्चभिः यतो यस्याः सकाशात् १६ सर्वाश्रमानुपादायेति। तान् पञ्चमहायज्ञादि
दानेन कृतकृत्यतां नयन् स्वयं तरतीत्यर्थः १७ आत्मनो देहस्यार्धं कर्मसु द्वयोः सहाधिकारात्। यज्ञादीनां

इति श्रीभावार्थे तृतीयस्कंधे त्रयोध्यायः १२ चतुर्दशानिधानेनतनस्थैवनसूच्यते संध्यायांकश्यपात्कर्मस्तिभवः। कामतोदितेः तेनैवयेनहरिणाभूमिरुद्धृता अनुश्रुममनस्सुवोत १ मथोपुष्ट ३ साधुस्वेदेनः यस्मादेव वताख्कथापष्टसीतिमत्योःपादाविशान्तयति सोचयतीतितथा ४ तदेवदर्शयति ययाकथयायाउत्तानपदः पुत्रोध्रुवः मुनिनानारदेनार्भकएवयदाध्रुवायस्वनेदांघ्रिभिर्विमानमानीततदास्यदेहमारोपितः स्यादिति मत्वावासनेपिदेहेन नमाज्ञ किंतुसोपानइवतस्ययदंदत्त्वाविमानमानीतंतदास्यदिव्यभावोपितः स्यादि

इति श्रीभागवतेतृतीयस्कंधेत्रयोदशोध्यायः १३ श्रीशुकः निशम्यकौशारविणोपवर्णितांहरेःक थाकारणसूकरात्मनः पुनःसपप्रच्छतमुद्यताञ्जलिर्नचातितृप्तोविदुरोधृतव्रतः १ विदुरउवाच तेनैवतत्तुनिश्रेष्ठहरिणायज्ञमूर्तिना आदिदैत्योहिरण्याक्षोहतइत्यनुशुश्रुम २ तस्यचोद्धरतः क्षोणींस्वदंष्ट्राग्रेणलीलया दैत्यराजस्यचब्रह्मन्कस्माद्धेतोरभून्मृधः ३ मैत्रेयउवाच साधु वीरत्वयापृष्टमवतारकथांहरेः यत्त्वंपृच्छसिमर्त्यानांमृत्युपाशविशातनीं ४ ययोत्तानपदःपु त्रोमुनिनागीतयार्भकः मृत्योःकृत्वैवमूर्ध्न्यंघ्रिमारुरोहहरेःपदं ५ अथात्राप्यीतिहासोयंश्रुतोमे वर्णितःपुरा ब्रह्मणादेवदेवेनदेवानामनुपृच्छतां ६ दितिर्दाक्षायणीक्षत्तर्मारीचंकश्यपंपतिं अप त्यकामाचकमेसंध्यायांहृच्छयार्दिता ७ इष्ट्वाग्निजिह्वंपयसापुरुषंयज्ञपतिंपति निम्लोचत्यर्केभ्यग्ना

पयसा१

रस्यग्निगृहमाहृतः ८ दितिरुवाच एषमांत्वत्कृतेविद्वन्कामआत्तशरासनः दुनोतिदीनांविक्रम्यरम्भामिवमतङ्गजः ९ तद्भवान्दह्यमानायांसपत्नीनांसमृद्धिभिः प्रजावतीनांभद्रंतेमय्यायुङ्क्तामनुग्रहं १०

९

पहिरागमयमिति ५ तयोःसंग्रामेहेतुरितिहासंप्रस्तौति अनुपृच्छतांदेवानांब्रह्मवर्णितइतिहासोमयाश्रुतः हेतुप्रश्नप्रस्तावाय प्रथमंहिरण्याक्षहिरण्यकशिपूत्पत्तिप्रसंगमाह दितिरित्यादिनायावदध्यायसमाप्ति मरी चेःवैपुत्रंहृच्छयः कामस्तेनार्दिता अतःसंध्यायामेवकामितवती ७ तदपिअग्निहोत्रशालायांतत्रापि समाहितमग्निंजिह्वयस्यतंयजुषायज्ञनामानंपुरुषंश्रीविष्णुं ८ ॥

स इत्थं भगवानुर्वीं विष्वक्सेनः प्रजापतिः। रसाया लीलयोन्नीतामप्सु न्यस्य ययौ हरिः॥ ४६

विस्मयं दर्शयन्तः प्रार्थयन्ते विधुन्वतेति द्वाभ्याम्। सटानां शिखाभिरुद्धूता उद्गलिता ये शिवाम्बुबिन्दवस्तैर्विमृज्यमाना वयं पवित्रीकृताः ४३ तव कर्मणां पारं य एषते तस्याते भ्रष्टमतिरित्यर्थः। यस्य तव योगमायया योगिनः सहयोगाः तेन मोहितमनो विश्वस्य शमेवाल्लेविधेहि यथा तासां मतिं स्यात् तथा किं ज्ञात्वा भवेत्। तस्याद्गृहाण प्रमादे कुर्वित्यर्थः ४४ उपस्थीयमानः स्तूयमानः स्वखुराक्रान्ते इति तले यथा स्थापयामास तथा दर्शयति अवि

विधुन्वता वेदमयं निजं वपुर्जनस्तपःसत्यनिवासिनो वयम्। सटाशिखोद्धूतशिवाम्बुबिन्दुभिर्विमृज्यमाना भृशमीश पाविताः ४३ स वै बत भ्रष्टमतिस्तवैष ते यः कर्मणां पारमपारकर्मणः। यदोगमायागुणयोगमोहितं विश्वं समस्तं भगवन्विधेहि शम् ४४ मैत्रेयः इत्युपस्थीयमानस्तैर्मुनिभिर्ब्रह्मवादिभिः। सलिले स्वखुराक्रान्त उपाधत्तावितावनिम् ४५ य एवमेतां हरिमेधसो हरेः कथां सुभद्रां कथनीयमायिनः। शृण्वीत भक्त्या श्रवयेत वोशतीं जनार्दनोऽस्याशु हृदि प्रसीदति ४७ तस्मिन्प्रसन्ने सकलाशिषां प्रभौ किं दुर्लभं ताभिरलं लवात्मभिः। अनन्यदृष्ट्या भजतां गुहाशयः स्वयं विधत्ते स्वगतिं परः पराम् ४८ को नाम लोके पुरुषार्थसारवित्पुराकथानां भगवत्कथासुधाम्। आपीय कर्णाञ्जलिभिर्भवापहामहो विरज्येत विना नरेतरम् ४९ ॥

तावत्कः ४७ कथनीयानि मायीति मायावे तिवरितानि श्रवयेत हृत्स्वमार्गं उशतीं कमनीयां हृदि प्रसीदति स्वमनसि मां तथ्यातीत्यर्थः ४८ यद्यपि सकलमात्मनीयार्थनीया इत्याह तस्मिन्नाशीर्भिस्तैर्लवात्मभिः तुच्छाभिः न च तदा भजतां सर्वे फलं शङ्कनीयमित्याह श्रीभगवान्जन प्रतिके रणफलान्तरं हि विना भजतां स्वयमेव विधत्ते गुहाशयत्वात् सुहृत्वाभक्तिज्ञानम् ४९ अतः को नाम पुराकथानां पूर्वकृत्तामध्ये कथं वि

पूर्वोक्तमेव सपरिकरं कीर्तयितुः प्रणामं तितिमसौ नम इति । अखिलमंत्रादिरूपाय क्रियात्मने । सामान्यमर्थाणां रूपा-
य । किंच वेदाः यत्प्रसूतकर्मसाध्यमन्तःशुद्धिः ततो भक्तिः ततः आत्मतत्त्वः चित्तस्थैर्यं तेनानुभावितं साक्षात्कृतं यत्ता-
नं तस्मै एवंभूतज्ञानप्रदाय गुरवे ४८ हे भूधर सभूधरा सपर्वता वनाद्युदकान्विता क्षितौ राजेंद्र सदनो दंतेन ।४९।
त्वया धृता भूर्विराजते इत्युक्तमिदानीं भूमंडलेन तद्रूपं विराजते इत्याह । त्रयीति । अथ मयांतरे ते इदं रूपं दंता-
ग्रेन धृतं यत् मंडले चकास्ति यथा भने शृंगाग्रे धृतो यो घनः तेन भूयसा अतिमहता विभ्रमो विलासः ।५०। लो-

नमो नमस्तेऽखिलमंत्रदेवताद्रव्याय सर्वक्रतवे क्रियात्मने । वैराग्यभक्त्यात्मजयानुभावितज्ञानाय विद्या-
गुरवे नमो नमः ॥४८॥ दंष्ट्राग्रकोट्या भगवंस्त्वया धृता विराजते भूधर भूः सभूधरा । यथा वनान्निःसर-
तो दता धृता मतंगजेंद्रस्य सपत्रपद्मिनी ॥४९॥ त्रयीमयं रूपमिदं च सौकरं भूमंडलेनाथ दता धृतेन ते ।
चकास्ति शृंगोढघनेन भूयसा कुलाचलेंद्रस्य यथैव विभ्रमः ॥५०॥ संस्थापयैनां जगतां सतस्थुषां लो-
काय पत्नीमसि मातरं पिता । विधेम चास्यै नमसा सह त्वया यस्यां स्वतेजोऽग्निमिवारणावधाः ॥५१॥
कः श्रद्दधीतान्यतमस्तव प्रभो रसां गताया भुव उद्विबर्हणम् । न विस्मयोऽसौ त्वयि विश्वविस्मये यो माय-
येदं ससृजेऽतिविस्मयम् ॥५२॥

कां च स्थानार्थे ते पत्नीं जगतां मातरं । यतस्त्वं पितासि एवं सति तत्र स्थिताः संतः त्वया पित्रा सह अस्यै पृथिव्यै
मात्रे नमसा विधेम नमनं करवाम । नमस्कारेणाचरामेति वा स्वतेजः धारणाशक्तिं याज्ञिकाः अग्निमर-
णौ इव आधुः न्यहितवानसि ।५१। इदं च त्वया अतिदुष्करं कृतमित्याह कः इति । हे प्रभो तव त्वया कृतं भुव उद्विब-
र्हणं उद्धरणं तदन्यः कः श्रद्दधीत स्पृहयेत् अथवा सिद्धांतार्थः । तथापि पुनरसौ विस्मयो न भवति । यतो विश्व-
सर्वविस्मया यस्मिन् । कुतो न भवतीति विस्मयमद्भुतं । इदं विश्वं क्रियाविशेषणं वा ससृजे सृष्टवान्

यदात्मनां प्रपंचयंतः स्तुवंति रूपमित्यादिचतुर्भिः छंदांसि गायत्र्यादीनि यत्त्वगाभूत् छंदः आद्यन्तु वारेण श्रीभग
वदवयवता विधीयते बर्हिः प्राग्दीर्घभावश्चार्थः दृशि चक्षुत्वात् सौचादिकवतश्च ३४ स्रुक्तुंडः ते
डमुखाग्रे स्रुवो नासिकयोः इडा भक्षणपात्रं च समाग्रहाश्च सोमपात्राणि प्राशित्रं ब्रह्मभागपात्रं ग्रासयते
नेनेति ग्रसने मुखोत्तर्वर्णे निर्दिष्टं चर्वणं भक्षितम् ३५ दीक्षा दीक्षणीयेष्टिः अनुजन्मकार्यं वारसमिध्यक्तिः उप
सदः तिस्र इष्टयः शिरोधरं ग्रीवा प्रायणीयादीनां नरेष्टिः उदयनीया समाप्तेष्टिः तेएव दंष्ट्रे यस्य सः

रूपं तवैतन्ननु दुष्कृतात्मनां दुर्दर्शनं देव यदध्वरात्मकं छंदांसि यस्य त्वचि बर्हिरोमस्वाज्यं दृशि त्व
ङ्घ्रिषु चातुर्होत्रं ३४ स्रुक्तुंड आसीत्स्रुव ईश नासयोरिडोदरे च चमसाः कर्णरंध्रे प्राशित्रमास्ये ग्र
सने ग्रहास्तु ते यच्चर्वणं ते भगवन्नग्निहोत्रं ३५ दीक्षानुजन्मोपसदः शिरोधरं त्वं प्रायणीयोद
यनीयदंष्ट्रः जिह्वा प्रवर्ग्यस्तव शीर्षकं क्रतोः सभ्यावसथ्यं चितयोसवो हि ते ३६ सोमस्तु
रेतः सवनान्यवस्थितिः संस्थाविभेदास्तव देव धातवः सत्राणि सर्वाणि शरीरसंधिः त्वं सर्वयज्ञक्रतु
रिष्टिबंधनः ३७ ॥

प्रवर्ग्यः महावीरः प्रमुपसदः पूर्वं क्रियते सभ्यो होमरहिताग्निः आवसथ्य औपासनाग्निः तयोर्द्वैकर्णे तज्ज
वत्तद्रूपस्य शीर्षकं शिरः चितयः इष्टकाचयनानि पंचासवः प्राणाः ३६ प्रातःसवनादीन्यवस्थितिरासनं वा
लाघवस्यावा अग्निष्टोमात्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोतिरात्रो आप्तोर्याम इति संस्थाभेदाः त्वग्मांसादिस
प्तधातवः सत्राणि द्वादशाहादीनि बहुयागसंघातरूपाणि असोमा यज्ञाः ससोमाः क्रतवः तद्रूपस्त्वं इष्टि
योजनं तदेव बंधनं यस्य सः ३७ २

नृहरेस्तयोरसातलेगाः प्रद्दीदर्शकस्तिपकः श्रीणिपद्मे बिसवनात्मकानि ॥ पर्वाणि यस्य यत्तमूर्तिविनर्दः ॥ किंकं वंसत्तरसा प्राप्ताश्च यतायाः लूनाः ॥ तनस्तस्याः खुरैरेवपादयन्कथंड मारणाय उपरागाया चास्मृस्मा नाथा रसनु सानैव श्याम्भवति तथा विदारयन् ॥ कथं भूतामग्रे मलयसमयेः ॥ तत्रतां स्वप्नसमुत्पाः शिरालियसुः सन्जीवाश्रीयते ॥ या स्या सर्वजीवाधारभूतायास्तु यमभ्यथन ॥ अभिमुखे नुदधार जठरे पूतवानि ॥ मूनेनोद्धरणो नानायासे यो तयति रसायाः सकाशाद्दुस्थितः सरूरुचेसमग्रशोभततत्राभ्यभक्तिमदास्तुयमस्याग कृतसंयान ॥ प्रीतिकृत्तेन सस्यः सा

खुरैः त्वरैर्दरयंस्तदायदुमारपारंत्रिपद्रसायां ॥ ददर्शगांतत्र सुपुष्पसंग्रेयां जीवधानीस्तयमभ्यथन ॥ २० ॥

स्वदंष्ट्रयोद्भृतमहीनिमग्नासड स्थितः सेरुरुचेरसायाः ॥ तत्रापि दैत्यगादयापतेनस्तुना भसंदीपितती अम सुः ॥ २१ ॥ जघ्यानसंस्थानससत्यविक्रमे सलीलये भस्त्रगवाडिवा भसि ॥ २२ ॥ तदृक्तपंको किन गंडल्वदाय थागजेंद्रोजगतीविभिंदन् ॥ तमालनीले सितदंतको ड्याल्ला सुद्दिपनेगजलीलयागा ॥ २३ ॥ प्रणा यवन्द्रो जलयोनुवाकेर्विविविमुखोड पतस्पुवीयः ॥ २४ ॥ जितंजिते ते जित यज्ञभावनत्रयीतनुं स्वा

हस्तो पवियुत्वंतेनमः ॥ यद्रोमगर्तेषु निलिल्युरध्वराः तस्मैनमः कारणासूकरायते ॥ २५ ॥ २ ॥ ॥

कृतावर्यो विक्रमोयस्युतंदैसंस्माभवत्रकं तद्वतां दीपितः ॥ मीत्रो मनुर्यस्य यदामयिविधमाने किस्तिपरिभवंस हृसद्दति स्तनाभसंदीपित मनुसश्रीभगवान सिंहोवाजं लीलया जघान ॥ २६ ॥ ३२ ॥ गजेंद्रो गजलीलया विदारय न् ॥ गेविकयायथाकणावड नुश्रवति ॥ यथा नस्वारक्रमेवपकलेनाक्रिनागंडो नेड वयस्यजवानेतिपूर्वेणा ॥ वधः ॥ प्रलयालत्वानुवाकः ॥ वेदिकसूर्क्र ॥ तन्महेशा वीरो तुष्टवुः ॥ ३३ ॥ भो अजितननयानिनजिनमिति संभ्रमोवीक्षापोनरक्ति ॥ यत्तेभावानेआक्रियतेइतियावयनीनिलिल्युर्लीनप्रायाः कारणाद्युधिवृहरगतेन

श्री. भा. टी. ५५

वार्गवितेतत्वात्तत्कराग्रभूमिं प्रतिश्रुत्येनयः स्वखेदः तस्मात् यज्ञतत्त्वांशकत्वे इति प्रवक्ति ॥ अस्मिन्द्विख्यापनार्थाभि
भिः पवित्रैः ऋग्यजुः सामभिः मन्त्रैः अस्तुवन् ॥२५॥ वेदे वितन्यते मूर्तिर्यस्य सः अत एवात्मनो गुणाननुवदतीति तथा त
तेषां ब्रह्मत्वोद्भावितं वेदमवधार्य ज्ञात्वा ॥२६॥ कीदृग्भूतः सन्नाविवेश तत्स्वरूपं वर्णयामास ॥ द्वाभ्यां उत्क्षिप्तो वालः पुच्छो
येन खेचरश्च आकाशचारी कठोरः कठिनः सटाः स्कन्धवालान् ॥ खराणि तीक्ष्णानि रोमाणि यस्यां सा त्वक् यस्य ॥ खुरैराह
तानि अभ्राणि येन तत् सितदंष्ट्रः शुक्लदंष्ट्रः ॥ ईक्षा निरीक्षणमेव ज्योतिरालोको यस्य तदा प्रकाशमानत्वभावात् ॥ बभासे

निशम्य ते घर्घरितं स्वखेदक्षयिष्णु मायामयसूकरस्य ॥ जनस्तपःसत्यनिवासिनस्ते त्रिभिः पवित्रैर्मु
नयोऽगृणन्स्म ॥२५॥ तेषां सतां वेदवितानमूर्तिः ॥ ब्रह्मावधार्यात्मगुणानुवादं ॥ विनद्य भूयो विबुधोद
याय गजेन्द्रलीलो जलमाविवेश ॥२६॥ उत्क्षिप्तवालः खचरः कठोरः सटा विधुन्वन्खररोमशत्वक् ॥
खुराहताभ्रः सितदंष्ट्र ईक्षा ॥ ज्योतिर्बभासे भगवान्महीध्रः ॥२७॥ घ्राणेन पृथ्व्याः पदवीं विजिघ्रन्क्रो
डापदेशः स्वयमध्वराङ्गः ॥ करालदंष्ट्रोप्यकरालदृग्भ्यामुद्वीक्ष्य विप्रान्गृणतोऽविशत्कं ॥२८॥ स वज्र
कूटाङ्गनिपातवेगविशीर्णकुक्षिः स्तनयन्नुदन्वान् ॥ उत्सृष्टदीर्घोर्मिभुजैरिवार्तः चुक्रोश यज्ञेश्वर
पाहि मेति ॥२९॥ २॥

अशोभत महीध्रः पृथिवीं उद्धृतवान् ॥२७॥ क्रोडापदेशः वराहरूपव्याजः स्वयमध्वराङ्गः यज्ञमूर्तिः ॥ कं जलमाविवेश ॥ विप्रा
न्विजिघ्रन्गृणतः ॥ स्तुवतः विप्रान् ॥ उद्वीक्ष्य अविशत् कं जलमाविशत् ॥२८॥ तदानीं तनः समुद्रः ऊर्मिभिः उत्सृ
ष्टत्वात् ॥ सउद्वान् ॥ समुद्रः आर्तइव स्तनयन् ॥ शब्दं कुर्वन् ॥ आयज्ञेश्वर मां पाहि ॥ मा समयत्वेन चुक्रोश ॥ आ
तं समयमाह ॥ उक्तानां द्विमाः प्रसादितादीर्घोर्मयः एव भुजैः विशिष्टः अतिवेगतः ॥ वज्रकूटोवज्रमा
यः पर्वतः ॥ तद्वदङ्गं यस्य तस्य श्रीभगवतः तस्य निपातवेगेन विशीर्णाः कुक्षिर्यस्य ॥२९॥ २॥

महीचेष्टितमयाह । यदोकः स्थानं मामस्यौहे देवप्रसाद देवा: ॥ ५ ॥ पूर्वं नपिपुनस्कांडएवोद्धृतानामयाम
येसत्रामवसन्नानिमग्नामसुतेषोउद्धरिष्यामि ॥ ६ ॥ चिंतामेवाह । सृजतोवाभिविद्धिरसांरसातलेई घ्रवेरां सर्वानि
पुतैः मेत्रजुष्ठैयंसएवविद्याद । संपादयतववाहृतोक । सूत्मववाह ॥ ८ ॥ खस्यश्चाकाग्रेस्पितःसन ॥ ९ ॥

सत्वानो

यदोकः सर्वभूतानां महीमग्नामहांभसि । प्रसाद उद्धराणो यतो देवदेवाविधीयतां ॥ ५ ॥ मैत्रेय उवाच ॥ एव
मेष्टीतयासंस्तुयतत्पासन्नामवेदगो । कथमेनासमुन्नेष्यइतिदध्यौ धियाविरे ॥ ६ ॥ सृजतोमेदितिर्वा
भिः स्तूयमानावसांगता । प्रथानकिमत्रहेयमस्माभिः सर्वयोजितैः ॥ ७ ॥ यस्माद्धृदयादामसई
पाहिविथातमः । इत्यभिध्यायतानातावियवानसहसानघ । वराहपोतकोनिर्गादंगुष्ठपरिमाणतः ॥ ८ ॥ ७
तस्याभिपश्यतःखस्थः क्षणेनकिलभारत । गजमात्रेप्रवृद्धेतदद्भुतमभूत्महत ॥ ९ ॥ मरीचिप्रमु २
खैः विप्रैः कुमारैर्मनुनासह । दृष्ट्वातत्सौकरंरूपंतर्कयामासविप्रया ॥ २० ॥ किमेतत्सौकरव्याजेन स
त्वंदिव्यमवस्थितं । अहोवताश्चर्यमिदनासायामेविनिःसृतं ॥ २१ ॥ दृष्टोंगुष्ठशिरोमात्रः क्षणाद्गंडशि
लासमः । अपिस्विद्भगवानेषयज्ञोमेखेदयन्मनः । इतिमीमांसतस्तस्यब्रह्मणः सहसूनुभिः । भगवान
यज्ञपुरुषोजगर्जागेंद्रसन्निभः ॥ २३ ॥ ब्रह्माणंहर्षयामासहरिस्तांश्चद्विजोत्तमान् । स्वगर्जितेनककु
भःप्रतिस्वनयताविभुः ॥ २४ ॥ २

विज्ञया नैकया ॥ २० ॥ पूर्वं मेगुष्ठप्रमाणोहृष्टः । गंडशिलासूक्ष्मपाषाणः स्थूलपाषाणः
तत्समोयज्ञः श्रीविष्णुः निजदूपतिवोयाने नमेमनः खेदयन्निति ॥ २२ ॥ मीमांसमानस्य कजंगर्जोगर्जित । गि
रीद्रतुल्यः ॥ २३ ॥ गर्जनप्रयोजनमाहब्रह्माणमिति ॥ २४ ॥

श्री· भाग· टी· ४४

त्वमेवैकः पिता सर्वेषां यतो जन्मकृद्वृत्तिदः पोषकश्च त्वमेव अतस्तव यद्यपि प्रत्युपकारो नास्ति तथापि सा कृतेन शु-
श्रूषा केन कर्मणा भवेत् तद्विधेहि त्वं न इत्यन्वयः हे ईड्य आत्मशक्तिषु कर्मसु मध्ये केन कर्मणा भवेत्तद्विधेहि
इदं कर्तव्यमिति कथय यत्कृत्वा यस्मिन्कृते सति विष्वक् सर्वतः ॥ ८ ॥ वां युवाभ्यां स्वस्ति भद्रं स्तात् भूयात् अ-
स भुवीति धातुः यद्यतः मां शाधि अनुशिक्षय इति त्वात्मना स्वयमेव अर्पितं निवेदितं अतः प्रीतोऽस्मि अपचितिः पूजा

मैत्रेयः। यदा स्वभार्यया साकं जातः स्वायंभुवो मनुः। प्रांजलिः प्रणतश्चेदं वेदगर्भमभाषत ॥ ६ ॥ त्वमे-
कः सर्वभूतानां जन्मकृद्वृत्तिदः पिता। अथापि नः प्रजानां ते शुश्रूषा केन वा भवेत्॥ तद्विधेहि नमस्तु-
भ्यं कर्मस्वीड्यात्मशक्तिषु। यत्कृत्वेह यशो विष्वगमुत्र च भवेद्गतिः ॥ ८ ॥ ब्रह्मोवाच। प्रीतस्तुभ्यमहं ता-
त स्वस्ति स्ताद्वां क्षितीश्वर। यन्निर्व्यलीकेन हृदा शाधि मेत्यात्मनार्पितं ॥ ९ ॥ एतावत्यात्मजैर्वीर कार्या ह्य-
पचितिर्गुरौ। शक्त्याप्रमत्तैर्गृह्येत सादरं गतमत्सरैः ॥ १० ॥ स त्वमस्यामपत्यानि सदृशान्यात्मनो
गुणैः। उत्पाद्य शास धर्मेण गां यज्ञैः पुरुषं यज ॥ ११ ॥ परं शुश्रूषणं मह्यं स्यात्प्रजारक्षया नृप। भग-
वांस्ते प्रजाभर्तुर्हृषीकेशोऽनुतुष्यति ॥ १२ ॥ येषां न तुष्टो भगवान्यज्ञलिंगो जनार्दनः। तेषां श्रमो ह्यपा-
र्थाय यदात्मा नादृतः स्वयं ॥ १३ ॥ मनुरुवाच। आदेशेऽहं भगवतो वर्तेयामीवसूदन। स्थानं त्विहानु-
जानीहि प्रजानां मम च प्रभो ॥ १४ ॥ २ ॥

गृह्येत आज्ञा इति शेषः। सनकादयो न कुर्वन्ति वयं किमिति किं विधास्यामः स एवंभूतो गतमत्सरो वा येभ्यः ॥ १० ॥ गां
शास शाधि पालयेत्यर्थः। पुरुषं हरिं ॥ ११ ॥ प्रजापालकस्य तुष्टो भविष्यति ॥ १२ ॥ यज्ञलिंगो यज्ञमूर्तिः अपगतो
र्थो यस्मात्तस्मै व्यर्थ एवेत्यर्थः यद्यस्मात् आत्मैव स्वयं नादृतः तस्मिन्नतुष्टे स्वार्थ एवासिद्धः सर्वात्मत्वा-
त्तस्य ॥ १३ ॥ वर्तेय वर्ते हे अमीवसूदन पापनाशन। अनुजानीहि अत्र स्थानं वसितुं ममानुज्ञां देहि ॥ १४ ॥ १ ॥ ४४

यास्त्री सास्यमहिष्यासीत् एषां वंशविवृद्धिं प्रापः ५४ तदेवाह सचापीति ५६ यतोयासां संततिभिः इति श्री
भावार्थदीपिकायां तृतीयेद्वादशः १२ त्रयोदशोस्मिन् स्वायंभुवमनोर्वाकस्मिकाम्भसि धरामुद्धर्तुमुद्यता क्रोडादेव्यावृत्सृदनं ॥
स्वायंभुवः पुत्रः तदेहाश्रात्वात् २ विष्वक्सेनोहरिः सेवाश्रयो यस्य ३ श्रुतस्य श्रीनिवासस्य चरितं श्रोतव्य

स्त्रीयासीच्छतरूपाख्या महिष्यस्य महात्मनः तदा मिथुनधर्मेण प्रजाह्येधां बभूविरे ५४ सचापिश
तरूपायां पंचापत्यान्यजीजनत् प्रियव्रतोत्तानपादौ तिस्रः कन्याश्च भारत ५५ आकूतिर्देवहूतिश्च प्र
रिति सूतिसत्तम आकूतिं रुचये प्रादात्कर्दमाय तु मध्यमां दक्षायादात्प्रसूतिं च यत आपूरितं जगत् ५६
इति श्रीभागवते तृतीयस्कंधे द्वादशोध्यायः १२ श्रीशुक० निशम्य वाचं वदतो मुनेः पुण्यतमां नृप
भूयः पप्रच्छ कौरव्यो वासुदेवकथादृतः १ विदुरउवाच सवै स्वायंभुवः सम्राट्प्रियः पुत्रः स्वयंभु
वः प्रतिलभ्य प्रियां पत्नीं किं चकार ततो मुने २ चरितं तस्य राजर्षेरादिराजस्य सत्तम ब्रूहि मे श्र
सुविर२ द्दधानाय विष्वक्सेनाश्रयोह्यसौ ३ श्रुतस्य पुंसां सुचिरश्रमस्य नन्वंजसा सूरिभिरीडितोर्थः यत्तद्गु
णानुश्रवणं मुकुंदपादारविंदं हृदयेषु येषां ४ शुकउवाच इति ब्रुवाणं विदुरं विनीतं सहस्र
शीर्ष्णश्चरणोपधानं प्रहृष्टरोमा भगवत्कथायां प्रणीयमानो मुनिरभ्यचष्ट ५ ॥

मित्याह स्वचिरं श्रमो यस्मिंस्तस्य पुंसो श्रुतस्य श्रवणं सेवार्थ ईडितः स्तुतः नन्वयं येषां हृदये स्थितं तेषां भागवतानां
गुणानुश्रवणं ४ सहस्रशीर्ष्णः श्रीकृष्णस्य चरणोपाधीयते यस्मिन् श्रीकृष्णः श्रीमन्नायस्य महाप्रहर्षस्यो
त्संगे ऊरौ चरणौ प्रसारयतीत्यर्थः तमभ्यचष्टाभ्यभाषत प्रणीयमानः तेन प्रवर्तमानः ५ २ ॥

श्री· भाग· टी· ४१

स्तुतः स्वाध्वनः अनुष्टुप् स्वावानीति श्रुते । महाकल्पे ब्रह्मा शाहृद्रूपाभवदिमङ्के । तदेव दर्शयन्नाभिनाम्बुरप्यति मा
हः । स्पर्शा इति सार्धेन स्पर्शाः कादिवर्णाः वर्गपंचके स्वराकारादि । ४६ । ऊष्माणश्चाभवन् सहृद्वक्त्रं अन्तस्थायरा
लवाः सप्त स्वराः षड्जादयः विहारेणाक्रीडया । ४७ । अत एव शब्दानुतन्वानात् । श्रीपरमेश्वरो नित्यप्रकाशमानेऽस्मा
हं । व्यक्तावेखरी व्यक्तः प्राणः तदात्मनः तस्य ब्रह्मणः परः परमेश्वरश्च भाति कीदृशः ब्रह्मपरिपूर्णः त

सन्त्याः पंक्तिरूपत्वादाहदन्तीच्छ्राणा ततोऽभवत् । स्पर्शस्तस्याभवज्जीवः स्वरो देह उदाहृतः ॥ ४६ ॥ ऊष्मा
णा सेंद्रियाण्यङ्गं तस्याबलमात्मनः । स्वराः सप्त विहारेण भवंति स्म प्रजापतेः ॥ ४७ ॥ शब्दब्रह्मात्म
नः तात व्यक्ताव्यक्तात्मनः परः । ब्रह्मैव भाति विततो नानाशक्त्युपबृंहितः ॥ ४८ ॥ ततोऽपरामुपादाय स सर्गा
य मनो दधे ॥ ४९ ॥ ऋषीणां भूरिवीर्याणामपि सर्गमविस्तृतं । ज्ञात्वा तद्धृदये भूयः चिंतयामास
कौरव ॥ ५० ॥ अहो अद्भुतमेतन्मे व्यापृतस्यापि नित्यदा । न ह्येधंते प्रजा नूनं दैवमत्र विघातकं ॥ ५१
एवं युक्तकृतस्तस्य दैवं चावेक्षतस्तदा । कस्य रूपमभूद्द्वेधा यत्कायमभिचक्षते ॥ ५२ ॥ ताभ्यां रूप
विभागाभ्यां मिथुनं समपद्यत । यस्तु तत्र पुमान्सोऽभून्मनुः स्वायंभुवः स्वराट् ॥ ५३ ॥ रा ॥ स

त्राय कात्मनो ब्रह्मरूपो विततो विभाति व्यक्तात्मनो नानाशक्त्युपबृंहितः । इंद्रादिरूपो भाति । ४८ । याम्यवी
विसृष्टासतीनीहारेत सोऽभवत् । ततोऽपरां प्रति चिंतयामास ज्ञात्वेति तेषां ब्रह्मत्वं तस्य सदास्पच । ४९ ।
तत्त्वं तदग्रहणाकारणमाह । ऋषीणामित्यादिना । ५० । युक्तकृतः युक्तोचितं चकुर्वतः । अत एव कस्य ब्र-
ह्मणः । देहः द्विधाभूत् निमित्तं यत्कायमधापि अभिचक्षते । ५२ ॥ राम

राम
४६

विधेतिग्रौवं ॥ तेन तसेव्यस्तान दिभुत्रिः पवमासते तिस्रस्ते ॥ दानमिति दयाभूताभयप्रदानस्य कलां नार्हति षोड
शीमिति वचनात् ॥ एवं च तपः शौचं दयासत्यमिति पादाः ॥ कृते कृताद्रिति प्रथमस्कन्धे केव विरोधः ॥५४॥ सावित्रम
स्यवृर्यं ॥ उपनयनादारभ्य गायत्रीमधीयानस्य त्रिरात्रं प्राजापत्यं ॥ व्रतान्याचरतः सांवत्सरं ब्राह्मं वेदग्रहणान्ते हृदये
छिकं वार्तानिषिद्धकर्मादिवृत्तिः ॥ संचयायायाजनादिवृत्तिः शालीनस्य याचितवृत्तिः शिलोञ्छं नृपतिनिकारवृत्तिः
एकवचनमार्षं इत्येता गृहे ॥ चेत्यय इति यद्वा शिलोञ्छ इति द्वंद्वैकवत्सप्तमी ॥ एवं चतुर्भिर्भेदैः सतिगृहे स्थिता ॥ संभवतो
मर्थः ॥५५॥ वने स्थिताः चत्वारः ॥ तत्र वैखानसा आकृष्टपच्याकृष्टतनयः ॥ वालखिल्यास्तु नवे संचितामन्या

कः पुनः

सावित्रं प्राजापत्यं च ब्राह्मं चाप्यष्टकं तथा ॥ वार्तासिं चयशालीनशिलोञ्छ इति वै गृहे ॥५५॥ वैखानसा
वालखिल्यौदुम्बराः फेनपा वने ॥ न्यासे कुटीचरः पूर्वं बहूदो हंसनिष्क्रियौ ॥५६॥ आन्वीक्षिकी त्रयी वा
र्त्ता दंडनीतिस्तथैव च ॥ एवं व्याहृतयः सप्त स्वाहान्तवर्तनः ॥५७॥ तस्योऽस्मि गायत्री सा लोम स्यात्
यश्चीचकचो विभो ॥ त्रिस्मपाति स्वतनोऽवृषु पूजनस्य स्त्रः प्रजापतेः ॥५८॥

सा

शिनः ॥ औदुम्बराः ॥ प्रातरुत्थाय यां दिशं प्रथमं पश्यन्ति तत आहृतैः फलादिभिर्जीवन्तः फेनपाः स्वयं पतितैः
फलादिभिर्जीवन्तः कुटीचराः स्वाश्रमकर्मप्रधानाः बहूदः कर्मोपसर्जनीकृतज्ञानप्रधानः हंसो ज्ञानाभ्या
स निष्ठः निष्क्रियः परमहंसः ॥ एते च सर्वे यथोत्तरं श्रेष्ठाः ॥५८॥ न्यायादीनां पूर्वादिक्रमेणोत्पत्तिमाह ॥ आन्वी
क्षिकीति ॥ आन्वीक्षिकी न्यायो धर्मकर्मविद्याः भूर्भुवः स्वरिति व्यस्ता व्याहृतयः ॥ समस्ता तुरीया ॥ यथा
आश्वलायनाः ॥ एवं व्याहृतयः ओंकाराद्याः सप्त स्वाहा इति ॥ यद्वा महरिति चतुर्थी ॥ तथा च श्रुतिः ॥ भूर्भु
वः स्वरिति वा ॥ एतासामुत्तमो व्याहृतयः ॥ तासामु ह स्मैतां चतुर्थीं महाचमस्यः प्रवेदयते मह इति ह्येव नः

[illegible] ॥ २

तेजीयसामपि तेजस्विनामपि सङ्गोर्कः सलीलिर्दैनं भवति येषां तेजीयसां हत्तं ॥ ३१ ॥ तत्त्वीतनुं ॥ ३२ ॥ कथं स्वस्ता मीत्यभिध्यायतः सृष्टुं स्याः ॥ चतः सीत्वयुक्तानुत्त्वान्समवेतान्नुसंधातान् ॥ चातुर्हौत्रं च तदैत्रादीनां च तांकि मितं च यज्ञविस्तारः उपवेदः पुराणाः नयो नीति शास्त्रे स्वसहस्राश्रमास्तदनयस्तासन् ॥ ३४ ॥ सुखतोसुखेभ्यः

तेजीयसामपि ह्येतन्न सुश्लोकं जगद्गुरो ॥ यद्वृत्तमनुतिष्ठन्वै लोकः क्षेमाय कल्पते ॥ ३१ ॥ तस्मै नमो भगवते य इदं स्वेन रोचिषा ॥ आत्मस्थं व्यंजयामास स धर्मं पातुमर्हति ॥ ३२ ॥ स इत्थं गृणतः पुत्रान्पुरो दृष्ट्वा प्रजापतीन् ॥ प्रजापतिपतिस्तन्वीं तत्याज व्रीडितस्तदा ॥ ३३ ॥ तां दिशो जगृहुर्घोरां नीहारं यद्विदुस्तमः ॥ कदाचिद्ध्यायतः स्रष्टुर्वेदा आसंश्चतुर्मुखात् ॥ ३४ ॥ कथं स्रक्ष्याम्यहं लोकान्समवेतान्यथा पुरा ॥ ३५ ॥ चातुर्होत्रं कर्मतन्त्रमुपवेदनयैः सह ॥ धर्मस्य पादाश्चत्वारस्तथैवाश्रमवृत्तयः ॥ ३६ ॥ विदुर उवाच ॥ स वै विश्वसृजामीशो वेदादीन्मुखतोऽसृजत् ॥ यद्यद्येनासृजद्देवस्तन्मे ब्रूहि तपोधन ॥ ३७ ॥ मैत्रेय उवाच ॥ ऋग्यजुःसामाथर्वाख्यान्वेदान्पूर्वादिभिर्मुखैः ॥ शास्त्रमिज्यां स्तुतिस्तोमं प्रायश्चित्तं व्यधात्क्रमात् ॥ ३८ ॥ आयुर्वेदं धनुर्वेदं गान्धर्वं वेदमात्मनः ॥ स्थापत्यं चासृजद्वेदं क्रमात्पूर्वादिभिर्मुखैः ॥ ३९ ॥ इतिहासपुराणानि पंचमं वेदमीश्वरः ॥ सर्वेभ्य एव वक्त्रेभ्यः ससृजे सर्वदर्शनः ॥ ४० ॥ षोडश्युक्थौ पूर्ववक्त्रात्पुरीष्यग्निष्टुतावथ ॥ आप्तोर्यामातिरात्रौ च वाजपेयं सगोसवम् ॥ ४१ ॥ विद्या दानं तपः सत्यं धर्मस्य

चातुर्होत्रं सृष्टिक्रममाह ॥ शास्त्रमप्रगीतमंत्रस्तोत्रं होतुः कर्म इज्यामध्वर्योः कर्म स्तुतिस्तोमः स्तुतिः संगीतं स्तोमं तदर्थं ॥ उद्गातृकर्म प्रायश्चित्तं ब्रह्मत्वं तेन भवतीत्यादिक्रमात् प्रयोज्य प्रायश्चित्तं ब्राह्म्यं ॥ ३८ ॥ उपवेदक्रममाह आयुर्वेदमिति आत्मनो मुखेभ्यः स्थापत्यं विश्वकर्मशास्त्रं ॥ ३९ ॥ कर्मतन्त्रक्रममाह षोडश्युक्थौ ॥ इति पूर्ववक्त्राग्नि

रुद्राणां सृष्टानन्तरं ॥१५॥ सृष्टा सृजति ॥१८॥ अधरदच्छदाद्रोष्ठात् देहान्तरेणाकृतं सर्गं वक्ष्यति देहान्तरेणाकाराणामा

रुद्राणां रुद्रसृष्टानां समन्ताद्ग्रसतां जगत् ॥ निशाम्यासंख्यशो यूथान्प्रजापतिरशङ्कत ॥१६॥ अलं प्रजाभिः
सृष्टाभिरीदृशीभिः सुरोत्तम ॥ मया सह दहन्तीभिर्दिशश्चक्षुर्भिरुल्बणैः ॥१७॥ तप आतिष्ठ भद्रं ते सर्वभू
तसुखावहं ॥ तपसैव यथापूर्वं स्रष्टा विश्वमिदं भवान् ॥१८॥ तपसैव परं ज्योतिर्भगवन्तमधोक्षजं ॥ सर्व
भूतगुहावासमञ्जसा विन्दते पुमान् ॥१९॥ मैत्रेय उवाच ॥ एवमात्मभुवादिष्टः परिक्रम्य गिरां पतिं ॥ बाढमि
त्यमुमामन्त्र्य विवेश तपसे वनं ॥२०॥ अथा ॥ मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः ॥ भृगुर्वसिष्ठो दक्षश्च
दशमस्तत्र नारदः ॥२२॥ उत्सङ्गान्नारदो जज्ञे दक्षोऽङ्गुष्ठात्स्वयंभुवः ॥ प्राणाद्वसिष्ठः संजातो भृगुस्त्वचि करा
त्क्रतुः ॥२३॥ पुलहो नाभितो जज्ञे पुलस्त्यः कर्णयोरृषिः ॥ अङ्गिरा मुखतोऽक्ष्णोऽत्रिर्मरीचिर्मनसोऽभव
त् ॥२४॥ धर्मः स्तनाद्दक्षिणतो यत्र नारायणः स्वयं ॥ अधर्मः पृष्ठतो यस्मान्मृत्युर्लोकभयंकरः ॥२५॥ हृ
दि कामो भ्रुवः क्रोधो लोभश्चाधरदच्छदात् ॥ आस्याद्वाक्सिन्धवो मेढ्रान्निरृतिः पायोरघाश्रयात् ॥२६॥
छायायाः कर्दमो जज्ञे देवहूत्याः पतिः प्रभुः ॥ मनसो देहतश्चेदं जज्ञे विश्वकृतो जगत् ॥२७॥ वाचं दुहितरं
तन्वीं स्वयंभूर्हरतीं मनः ॥ अकामां चकमे क्षत्तः सकाम इति नः श्रुतं ॥२८॥ तमधर्मे कृतमतिं विलोक्य पितरं
सुताः ॥ मरीचिमुख्या मुनयो विश्रम्भात्प्रत्यबोधयन् ॥२९॥ नैतत्पूर्वैः कृतं त्वद्य न करिष्यन्ति चापरे यत्त्वं
दुहितरं गच्छेरनिगृह्याङ्गजं प्रभुः ॥३०॥ ५ भिध्यायतः सर्गं दश पुत्राः प्रजज्ञिरे ॥ भगवच्छक्तियुक्तस्य
स्य लोकसंतानहेतवः ॥२१॥ मरीचि ५

हृ ॥ वाचमित्यादिना ॥२८॥ तन्वन्नोपेक्षणीया । प्रसादयोऽन्येवानेरेतत्रहृतं ॥ प्रवाजेकारसं ॥ ८ ॥ ॥ वाक्यं ॥ तन्वे

श्री॰
भा॰टी॰
४॰

यद्यपिप्रतिकल्पंसनकादिसृष्टिर्नास्तितथापिब्रह्मसर्गादिषूच्यतेवस्तुतस्तुस्वायंभुवसर्गादयएवप्रतिकल्पंभ
वंति॥सनकादयस्तुब्रह्मकल्पसृष्टाएवानुवर्तंते॥४॥स्वभूर्ब्रह्मा॥५॥अवध्यातोऽवज्ञातःप्रत्याख्यातमनुशास

सनकंचसनंदंचसनातनमथात्मभूः॥सनत्कुमारंचमुनीन्निष्क्रियानूर्ध्वरेतसः॥४॥तान्बभाषेस्वभूः मं
पुत्रान्प्रजाःसृजतपुत्रकाः॥तन्नैच्छन्मोक्षधर्माणोवासुदेवपरायणाः॥५॥सोवध्यातःसुतैरेवंप्रत्या
ख्यातानुशासनैः॥क्रोधंदुर्विषहंजातंनियंतुमुपचक्रमे॥६॥धियानिगृह्यमाणोपिभ्रुवोर्मध्यात्प्रजाप
तेः॥सद्योजायततन्मन्युःकुमारोनीललोहितः॥७॥इतितस्यवचःपाद्मोभगवान्परिपालयन्॥अभ्य
धाद्भद्रयावाचामारोदीस्तत्करोमिते॥८॥सवैरुरोददेवानांपूर्वजोभगवान्भवः॥नामानिकुरुमेधा दे॰
तःस्थानानिचजगद्गुरो॥९॥यदरोदीःसुरश्रेष्ठःसोद्वेगइवबालकः॥ततस्त्वामभिधास्यंतिनाम्ना
रुद्रइतिप्रजाः॥१०॥हृदिंद्रियाण्यसुर्व्योमवायुरग्निर्जलंमही॥सूर्यश्चंद्रस्तपश्चैवस्थानान्यग्रेकृ
तानिमे॥११॥मन्युर्मनुर्महिनसोमहाञ्छिवऋतध्वजः॥उग्ररेताभवःकालोवामदेवोधृतव्रतः
॥१२॥धीर्वृत्तिरुशनोमाचनियुत्सर्पिरिलांबिका॥इरावतीसुधादीक्षारुद्राण्योरुद्रतेस्त्रियः॥१३॥
गृहाणैतानिनामानिस्थानानिचसयोषणः॥एभिःसृजप्रजाबह्वीःप्रजानामसियत्पतिः॥१४॥इ
त्यादिष्टःसगुरुणाभगवान्नीललोहितः॥सत्वाकृतिस्वभावेनससर्जात्मसमाःप्रजाः॥१५॥

नैच्छन्॥५॥वासौमन्युस्तन्मन्युः॥७॥बालकइव॥१०॥अग्रेपूर्वमेवकल्पितानिमया॥११॥सयोषणाःस
स्त्रीकः॥एभिःस्थानैर्नामभिश्चयुक्तः॥१४॥सत्वबलमाकृतिर्नीललोहितास्वभावस्ती - - - ॥१५॥ ५८

भूम्यादयस्तत्कंचनतत्त्वपंचयन्नाह ॥ विकारैः षोडशभिर्युक्तैरष्टप्रकृतिसंयुक्तैः सहितः तदारब्धः इत्यर्थः ॥ अयमंडकोशो यत्र प्रविष्टः ॥ परमाणुवल्लक्ष्यते ॥ इत्युत्तरेणान्वयः कीदृशः बहिः पंचाशत्कोटियोजनविस्तृतः वहिश्च विशेषादिभिः समावृतः ॥ ३९ ॥ कीदृशैरंडकोशप्रमाणाद्दशगुणोत्तरोत्तराधिकैर्यत्र तेः न केवलमयमेक एवापि तत्रान्येपि लक्ष्यंते ॥ ४० ॥ सर्वेषां कारणानां कारणानां परमस्वरूपं ॥ ४१ ॥ इति श्रीभागवतार्थदीपिकायां तृतीये एकादशः ॥ ११ ॥ द्वादशे तु कुमारादिमनः सर्गसमेधनात् ॥ कायद्वैधेन योनेत्वमनुसर्गान्निवर्णते ॥ अग्रे इति ब्रह्मा स्वसृष्टौ प्रथमं अविद्यावृत्तीः

विकारैः सहितो युक्तैर्विशेषादिभिरावृतः ॥ अंडकोशो बहिरयं पंचाशत्कोटिविस्तरः ॥ ३९ ॥ दशोत्तराधिकैर्यत्र प्रविष्टः परमाणुवत ॥ लक्ष्यतेंतर्गताश्चान्ये कोटिशो ह्यंडराशयः ॥ ४० ॥ तदाहुरक्षरं ब्रह्म सर्वकारणकारणं ॥ विष्णोर्धाम परं साक्षात्पुरुषस्य महात्मनः ॥ ४१ ॥ इति श्रीभागवते तृतीयस्कंधे एकादशोध्यायः ॥ ११ ॥ मैत्रेय उवाच ॥ इति ते वर्णितः क्षत्तः कालाख्यः परमात्मनः ॥ महिमा वेदगर्भोथ यथास्राक्षीन्निबोध मे ॥ ससर्जाग्रेंधतामिस्रमथतामिस्रमादिकृत ॥ महामोहं च मोहं च तमश्चाज्ञानवृत्तयः २ दृष्ट्वा पापीयसीं सृष्टिं नात्मानं बह्वमन्यत ॥ भगवद्ध्यानपूतेन मनसान्यां ततोसृजत ३ ॥

ससर्ज तमो नाम स्वरूपाप्रकाशः मोहो देहाद्यहंबुद्धिः ॥ महामोहो भोगेच्छा तामिस्रः तत्प्रतिघातक्रोधोंधतामिस्रः तन्नाशेप्यहमेव मृतोस्मीति बुद्धिः ॥ तदेवाकं चैतन्यं वै ॥ तमोऽविवेको मोहः स्यादंतःकरणविभ्रमः ॥ महामोहस्तु विज्ञेयो ग्राम्यभोगसुखैषणा ॥ मरणं ह्यंधतामिस्रः तामिस्रः क्रोध उच्यते ॥ अविद्या पंचपर्वैषा प्रादुर्भूता महात्मन इति ॥ पातंजलेप्युक्तं ॥ अविद्यास्मितारागद्वेषाभिनिवेशाः पंच क्लेशाः इति ॥ श्रीविष्णुस्वामिप्रोक्तावा ॥ अज्ञानविपर्यासा ॥ भेदभयशोकाः ॥ तदुक्तं स्वाहाङ्गुन्यविपर्यासेत्यादि ॥ २ ॥ नवहमन्यत

बो॰

जनलोकं प्रालयायैषां महर्लोकागमनं तत्रमेषां चैतेः ३० वैराग्यार्थमाह एवंविधैरहोरात्रैर्वर्षशतं सर्वेषां प्राणि
नामायुषः परं अधिकं ब्रह्मणस्ततो यदायुः तदपक्षितमभिलीनमिवेति लोकोक्तिः गतप्रायमित्यर्थः ३३ अप
क्षितत्वमाह यदिति ३४ पूर्वस्य परार्धस्यादौ त्रिभिः वस्तुकथनमात्रे ३५ पद्मनेदेन ३६ अयं तु द्वितीय
स्यादौ वराहः कल्पः कथित इति सम्बन्धः ३७ तदेव कालेन निमित्तेन सृज्यानामायुः परिमाणमुक्त्वा कालपरि

ऽन्तः स तस्मिन्सलिल आस्तेऽनन्तासनो हरिः । योगनिद्रानिमीलाक्षः स्तूयमानो जनालयैः ॥ ३२ ॥ एवंविधै
रहोरात्रैः कालगत्योपलक्षितैः । अपक्षितमिवास्यापि परमायुर्वयःशतम् ॥ ३३ ॥ यदर्धमायुषस्तस्य परार्धम
भिधीयते । पूर्वः परार्धोऽपक्रान्तो ह्यपरोऽद्य प्रवर्तते ॥ ३४ ॥ पूर्वस्यादौ परार्धस्य ब्राह्मो नाम महानभूत् । कल्पो य
त्राभवद्ब्रह्मा शब्दब्रह्मेति यं विदुः ॥ ३५ ॥ तस्यैव चान्ते कल्पोऽभूद्यं पाद्ममभिचक्षते । यद्धरेर्नाभिसरस आसी
ल्लोकसरोरुहम् ॥ ३६ ॥ अयं तु कथितः कल्पो द्वितीयस्यापि भारत । वाराह इति विख्यातो यत्रासीच्छूकरो
हरिः ॥ ३७ ॥ कालोऽयं द्विपरार्धाख्यो निमेष उपचर्यते । अव्याकृतस्यानन्तस्य ह्यनादेर्जगदात्मनः ॥ कालो
ऽयं परमाण्वादिर्द्विपरार्धान्त ईश्वरः । नैवेशितुं प्रभुर्भूम्न ईश्वरो धाममानिनाम् ॥ ३९ ॥ ॥

केचित्तु द्वितीयमाह कालोऽयमिति पञ्चभिः उपचर्यते केवलं न त्वनेनापि क्रमेणायुर्गणनं तत्र हेतुमाह अव्याकृता
स्य कार्योपाधिशून्यस्य अत एवानन्तस्यानादेश्च जगदात्मनो जगत्कारणस्य ३८ तस्य विकृष्टकालस्यासीमत्वं द
र्शयन्नाह कालोऽयमीश्वरः समर्थोऽपि भूम्नः परिपूर्णस्य ईशितुं न प्रभुः समर्थः ये तु धाममानिनो देहगेहाभिमा
नामीश्वरः ३९ ॥ ॥ ॥

तत्रदिनस्थितिमाह निशावसानसमयादिसार्धत्रिभिश्चतुर्दशामनून्भुजन्तमास्वविनितार्थः २२ किंविशिष्टा
कायुगानामेकसमतिमन्वंशाहस्वीपालकाः क्रमेणाभवंति समाप्तिप्रभृनयलयुगपत्समकालमेवभवंतिसु
वेषारः नानुवर्ततिबेषांयदारयस्तत्तापि २४ त्रैलोक्यवर्तयतीतितथा २५ समूर्तिभिः मनंतरायतीर्थंनादिभि
र्हविभूतेरविष्णुतप्रकष्टकारः मन विक्षरत्ति २६ रात्रिगतांस्थितिमाहपंचभिः तमसामावालेशप्रतिसे

निशावसानआरभ्य लोककल्पानुवर्तते यावद्दिनं भगवतो मनूंभुंजन्नतर्दशा २२ सर्वकालमनर्भ
तसाधिकामेकसमतिं मनंतरेषुमनवः तद्वद्यथाक्रमयः स्मराः २४ भवंतिचैवयुगपत्सर्वेषांश्चान्
यचतानं २४ प्रभदेवंदिनः सर्वोत्रालसेलोकावर्तनः तिर्यङ्नृपितृदेवानां संभवोयत्रकर्मभि :
२५ मनंतरेषुभगवानिभुत्तंत्वमूर्तिभिः मन्वादिभिरिदंविश्वमवत्युदितपौरुषः २६ तमोमा
त्रामुपादायप्रतिसंरुद्धविक्रमः काले नानुगतोशेषमास्तेतूष्णीदिनात्यये २७ तमेवान्वपिधीयंते
लोकाभूरादयः त्रयः निशायामनुवृत्तायांनिर्मुक्तशशिभास्करं २८ त्रिलोक्यांदह्यमानायांशक्त्या
कर्षणाग्निना यातृष्माणंमहर्लोकाज्जनंभृग्वादयोर्दिताः २९ तावत्त्रिभुवनंसद्यः कल्पांतैधितसिंध
वः प्लावयंत्युत्कटाटोपचंडवातेरितोर्मयः ३० ॥

रुद्धः प्रसरः तेविक्रमोयेनसः अनुगतमनुप्रविष्टमशेषंयस्मिन् २७ तदेवसूपद्दयतितमेवेति अपिधीयंतेइति
कर्मकर्तरिप्रयोगः तिरोहिताभवंतीत्यर्थः कथं निर्मुक्तौरहितः शशीभास्करश्चयस्यांभवतितथा श्रीभ
गवत्कृतिरूपायः संकर्षणोमुखोग्निस्तेनोष्माणोर्दिताः संतः जनलोकंयांति २९ कल्पांतेनैधिताः सिंधवः स
मुद्राः उत्कटआटोपः क्षोभोयेषांतेचतेचंडवातेरितोर्मयश्च ३० ॥

श्री
भाग
टी
३५

इदं स्वमानेन तु वर्षशतमायुर्युक्तानि परमेकं कल्पते सज्यते इति कल्पः त्रैलोक्यं तस्माद्बहिर्ये महर्लोकादि विदो ज्ञानिनः १७ १५
योगराद्धेन योगसंसिद्धेन १८ द्वादशभिर्वर्षसहस्रैरित्यर्थः तत्र एकैकसामान्यं तेन तत्संख्यं व धीयते त्वं बुधानं सं
ध्यासंध्यांशसहितं १९ कृतयुगे चत्वारि सहस्राणि तन्मध्ये संध्यांशयोः शतानि च एवं त्रेतादिष्वपि योज्यं
युगस्यादौ संध्या अन्ते संध्यांशः उक्तानि शतानि संख्याययोः तयोरन्तरे मध्ये युगं तस्य संध्यांशमाहुः यत्र त्रेतादिषु गवालवादिधर्म

विदुर उवाच पितृदेवमनुष्याणामायुः परमिदं स्मृतं परेषां गतिमाचक्ष्व ये स्युः कल्पाद्बहिर्विदः १७
भगवान्वेद कालस्य गतिं भगवतो ननु विश्वं विचक्षते धीरा योगराद्धेन चक्षुषा १८ मैत्रेय उवाच कृतं त्रे
ता द्वापरं च कलिश्चेति चतुर्युगं दिव्यैर्द्वादशभिर्वर्षैः सावधानं निरूपितं १८ चत्वारि त्रीणि द्वे चैकं कृ कृत१६
तादिषु यथाक्रमं संख्यातानि सहस्राणि द्विगुणानि शतानि च १९ संध्यासंध्यांशयोरन्तर्यः कालः श त्रेता१२
तसंख्ययोः तमेवाहुर्युगं तज्ज्ञा यत्र धर्मो विधीयते २० धर्मश्चतुष्पान्मनुजान्कृते समनुवर्तते स एवा न्ये द्वापर८
ष्वधर्मेण व्येति पादेन वर्धता २१ त्रिलोक्या युगसाहस्रं बहिराब्रह्मणो दिनं तावत्येव निशा तात यन्नि कलि४
मीलति विश्वसृक् २२ ॥

विशेषो यत्र विधीयते इत्यर्थः कृतयुगे तु संध्यासंध्यांशयोः तयोरप्येतद्युगे तत्र धर्मस्तत्संध्यासंध्यांशयोर
प्यस्तीव २० चतुष्पात्संपूर्णः त्रेतादिषु पादेन पादेन व्येति ह्रसति पादेन पादेन वर्धमानेनाधर्मेणेत्यर्थः एतच्च
स्वरूपकथनमात्रं वैराग्यार्थं न तु धर्मनैकाचार्यः २१ त्रिलोक्या बहिर्महर्लोकमभिव्याप्य कालयुगसहस्रं ए
कं दिनं यत यस्यां निशि विश्वसृक् ब्रह्मा निमीलति स्वपिति २२

महनीप्रवृत्तोत्रे ॥ पञ्चमासा प्रथमं दिवी यद्योत्तरे तोमयः देवानामहोरात्रे प्राकृत्यं दशमासः ॥ ३ ॥ अनेन क्रमेण
मासाः पौर्णिमामाप्तः पञ्चपर्ततीत्याह ॥ ८ ॥ दर्शादेर्शान्ताः त्रिंशाद्दिनमनुसावेनमासः रविसंक्रान्तिविधिनः सौ
रामासा निगयतेनतः गृहाः चन्द्रादयः कल्पाभ्यामादीनि नाराग्मानि नक्षत्राणि नटुपलक्षितः पूर्णिमाति कृत
यमाल कल्कतेर स्थितनितामिषः कालात्माविश्वरीश्वरः सूर्यः जगद्गतश्चारासपात्मकभुवनकोशपर्येतिपर्यटति
संवत्सरादिभदेश्वसोवर्षहं सप्तसावनर्चा इनक्षत्रमासभदेन इत्यर्थः केचित्तनरेवमाहुः यदा सूर्यः प्रतिपदि संक्रा
न्तिर्भवति तदा मासरचाद्यमासयार्युगपद्रूपक्रमो भवति संवत्सरः ततः सौरमासेन वर्षषष्टिदिनानि वर्धते चान्द्रमासेन
यमास्यनास्यनारोमर्षीनामहनीउम ॥ पतः पञ्चदशाहानि पुक्ताः कृत्स्नमासानद ॥ ४ ॥ तयोः समुच्चयो
मासः पितृणानदहनिशं देवानामृतुः षडयनं दक्षिणं चोत्तरं दिवि ॥ ५ ॥ अयनेनाहनी प्राकृतं वत्सरो द्वादश
स्मृतः संवत्सरशतं नृणां परमायुर्निरूपितं ॥ ६ ॥ ग्रहर्क्षताराचक्रस्थः परमाण्वादिना जगत् संवत्सरा
वसानेन पर्येत्यनिमिषो विभुः ॥ ७ ॥ संवत्सरः परिवत्सर इडावत्सर एव च अनुवत्सरो वत्सरश्च विदुरैवं प्रभा
षते ॥ ८ ॥ यः सृज्यशक्तिमुरुधोच्छ्वसयन्स्वशक्त्या पुंसोऽभ्रमाय दिवि धावति भूतभेदः कालाख्यया गुणमयं
क्रतुभिर्वितन्वंस्तस्मै बलिं हरत वत्सरपंचकाय ॥ ९ ॥
चषष्टिपदिनानि हृतानि श्रमन्ते इति ह्राद्दशादिनस्युधा नादु
भयोरयुपश्चादो भवति एवं पञ्चयवधानतारतम्येन पञ्चवर्षाणि युक्तानि तन्मध्ये द्वौ मलमासौ भवतः ततः प
नः षष्टः वत्सरो भवति ॥ ४ ॥ एवंभूतः कालः कालात्मा नित्यमप्रमेयः पूजनीय इत्याह य इति सृज्यकार्यं प्रकृत्या
दितद्विषयवीजादीनां शक्तिकालरूपेण सृज्यात्मा अक्षधा उक्तमूर्धनकार्याभिमुखीकुर्वन् दिवि तरेत्तेधावतिको
सौ भूतभेदः महाभूतविशेषः तत्तोपमिव लक्ष्मीसूर्यः किमर्थं धावति पुंसः पुरुषस्याप्रभाय श्रमं मोहं तत्ति वृत्त्यर्थम्
गुणादिकयेनविधया सहिताः निवर्तयति यष्टेः सकामानां तत्सुमयसर्गादिफलं क्रतुभिर्वितन्वयन्तस्मै संवत्स

श्री
भाग.
टी.
३८

तदेवं प्रपंचयति सद्रूपाद्दिनाम्ना प्रपंचस्य परमाणोः परमाणवस्थां यो भुंक्ते स कालः परमाणुः प्रपंचस्याविशेषा
वस्थां यो भुंक्ते स एव परमाणवस्थः परम महान् स्थूलः अयमर्थः ग्रहनक्षत्रचक्रस्थस्यादिनाथस्य सूर्यस्य पर्यट
नेवस्थाने तत्र सूर्यो यावता परमाणुनादेशमतिक्रामति तावान्कालः परमाणुः यावता कृत्स्नं द्वादशराश्यात्मकं सर्वं भुवनको
शमतिक्रामति स परममहान्संवत्सरात्मकः कालः तस्यैवायुगमनं नगतिक्रमेण हि पदार्थान्न मिनितस्या
वयवमेस्तथंगमेवकालोदिविभागवत्याअ इदानीं गुणकादिलक्षणं पूर्वकं मध्यमकालावस्थां कथयति द्वौ
परमाणू अणुः स्यात् त्रयो गावः त्रसरेणुः सत्प्रसरेणु सार्धं जालार्थितिगवाक्षो ए विद्यार्कस्य समवगतः को भां या

स कालः परमाणुर्वै यो भुंक्ते परमाणुतां। सतो विशेषभुग्यस्तु स कालः परमो महान् ॥४॥ अणुर्द्वौ पर
माणू स्यात्त्रसरेणुस्त्रयः स्मृतः। जलार्करश्म्यवगतः खमेवानुपतन्नगात् ॥५॥ त्रसरेणुत्रिकं भुंक्ते यः का
लः स त्रुटिः स्मृतः। शतभागस्तु वेधः स्यात्तैस्त्रिभिस्तु लवः स्मृतः ॥६॥ निमेषस्त्रिलवो ज्ञेय आम्नातास्ते त्र
यः क्षणः। क्षणान्पंच विदुः काष्ठां लघु ता दश पंच च ॥७॥ लघूनि वै समाम्नाता दश पंच च नाडिका। ते द्वे
मुहूर्तः प्रहरः षड्यामः सप्त वा नृणाम् ॥८॥ द्वादशार्धपलोन्मानं चतुर्भिश्चतुरंगुलैः। स्वर्णमाषैः कृतच्छिद्रं

तिलघुनेन खमेवानुपतन्नगान्नगात ः पाठांतरे खमेवानुपपतेत्वगतः ननु गाः स्त्री ॥ शतभागास्तद्रूपाय सिन्न
वेधः तैर्वेधैस्त्रिभिर्निमेषास्त्रयः क्षणः त्र्याम्नातः काष्ठापंचदश पंच लघु ८ पूर्वेण महार्थः ॥१०॥ नाडिकाषट् सप्त वा
प्रहरः स एव यामो दिनस्य रात्रेश्च चतुर्थो भागः ह्रासवृद्धेः समस्यायां मुहूर्तेन कुर्वीत निज्ञानत्वंतव्याख्यानियमार्थो
वाथाः प्रमदृतद्रे दृश्यमानोपि तमः शाकाकालान ॥ नाडिकायाउन्मानमाहद्वादशीयतेनेनेति उन्मानपात्रे षट्पलता
अभिर्विचितं पंचगुंजामाष ४ तैः चतुर्भिश्चतुरंगुलायामशलाकारूपैर्विचितैः कृतमूलच्छिद्रं तेन छिद्रेणायाव
त्प्रस्थपरिमितं जलं प्रविशति न च मस्तं निमग्नं भवति तावान्कालो नाडिका अत्र फलच्छिद्रयोराधिक्ये सति सज्ज

इति श्रीभागवते तृतीये दशमः ॥ १० ॥ तत्र प्रकाश्यते कालः परमाण्वादिलक्षणः ॥ प्राणमन्वन्तरादिभ्यः कल्पमानादि वि-
र्यते ॥ १ ॥ तदेवं सामान्यतः कालस्योपलक्षणं भूतगुणव्यतिकरदृशा विदन्निरूपितानीतस्यैव विशेषं निरूपयितुं तत्रापि
क्षेपं वस्तु लक्षयति द्वाभ्यां सतो मायाकाशपृथिव्यादीनां द्रव्याणां यो विशेषः परस्परनिवृत्तात्मा तेषां यः चरमः कारणा-
त्मा कार्यावस्थामप्राप्तः असंयुतः यावत्तावत्सर्वैः परमाणुभिः समुदायावस्थां प्राप्नोति यावत्तावदनपवर्गः कार्यसमुदाया-
वस्थायामपगमः कार्यनाशात् सपरमाणुर्विज्ञेयः किं तत्र प्रमाणं अत आह यतो येभ्यः समूहितेभ्यः नृणां
बहूनां नृणां वृन्दकार्ये ऐक्यभ्रमो यस्मिन्बुद्धिः तथाच पक्षमण्ववयविनिराकरणो ... समूहमात्रमेवावि-

मैत्रेय उवाच

इति श्रीभागवते तृतीयस्कन्धे दशमोऽध्यायः ॥ १० ॥ शुक उवाच ॥ चरमः सद्विशेषाणामनेकोऽसंयुतः सदा । प-
रमाणुः स विज्ञेयो नृणामैक्यभ्रमो यतः ॥ १ ॥ सत एव पदार्थस्य स्वरूपावस्थितस्य यत् । कैवल्यं परममहान-
विशेषो निरन्तरः ॥ २ ॥ एवं कालोऽप्यनुमितः सौक्ष्म्ये स्थौल्ये च सत्तम । संस्थानभुक्त्या ... भग-
वानव्यक्तो व्यक्तभुग्विभुः ॥ ३ ॥

शेष इति कार्यानुपपत्त्या कल्प्यत इति भावः ॥ १ ॥ सूक्ष्मं लक्षयित्वा स्थूलमाह सत एवेति यस्य चरमो ह्यंशः परमाणुः तस्यै-
व सतः कार्यमात्रस्य स्वरूपावस्थितस्यापरिणामान्तरमप्राप्तस्य यत्कैवल्यमैक्यं स परममहान् ॥ स च परमाणुप्र-
तियोग्युपलक्षितः ननु नानाविशेषवान् परस्परभिन्नश्च समर्थः पदार्थः कथमैक्यं तस्य न त्वाह अविशेषविवर्तावधि-
नः निरन्तरः भेदविवर्जितश्च सर्वोऽपि प्रपञ्चः परममहानित्यर्थः ॥ २ ॥ यथा सूक्ष्मः स्थूलश्चायं पदार्थः एवं का-
लोऽप्यनुमितः तत्र कार्यावस्थामावस्थानुवृत्तिसंस्थानेन परमाण्वाद्यवस्थान्तरस्य भुक्तिर्व्याप्तिः तया भगवानितिह-
रेः शक्तिः स्वतोऽव्यक्तः संस्थानभुक्त्या सूक्ष्मः व्यक्तभुक्त्या स्थूलः व्यक्तं भुङ्क्ते व्याप्नोतीति परिच्छिनत्तीति तथा विभुः

अष्टाविंशतिभेदानाह गवादय उष्ट्रांताः द्विशफाः खरादय एकशफाः षट् श्वादयः गोधांताः पंचनखा द्वादश एवं पशवः सप्तविंशतिः मकरादयो जलचराः कंकादयश्च खगाः अभूतवत्तेनैकीकृत्य गृही ता एवमष्टाविंशतिभेदा भवंतीत्येषु कुलककुंगोधामृगविशेषाः सुतेषामपि तिर्यक्त्वात् ... वानभेदः २१ अर्वाक्स्रोत इति अर्वाक्स्रोतः आहारः संचारो वा यस्य स अर्वाक्स्रोता दुःखमात्रेषु सुखमानिनः रजो धिकयेषु ते २४ देवसर्गोपि प्राकृतः वैकृतश्च वैकारिकादहंकाराज्जनितत्वात् एतच्च प्राग्वैकृतापेक्षया कौमार

गौरजो महिषः कृष्णः सूकरो गवयो रुरुः द्विशफाः पशवश्चेमे अविरुष्ट्रश्च सत्तम २० खरोश्वो
श्वतरो गौरः शरभश्चमरी तथा एते चैकशफाः क्षत्तः शृणु पंचनखान् पशून् २१ श्वा सृगालो वृको
व्याघ्रो मार्जारः शशशल्लकौ सिंहः कपिः गजः कूर्मो गोधा च मकरादयः २२ कंकगृध्रबकश्येन
भासभल्लूकबर्हिणाः हंससारसचक्राह्वकाकोलूकादयः खगाः २३ अर्वाक्स्रोतस्तु नवमः
क्षत्तरेकविधो नृणाम् रजोधिकाः कर्मपरा दुःखे च सुखमानिनः २४ वैकृतास्त्रय एवैते देवसर्ग
स्तु सत्तम वैकारिकस्तु यः प्रोक्तः कौमारस्तूभयात्मकः २५ देवसर्गश्चाष्टविधो विबुधाः पितरो
ऽसुराः गंधर्वाप्सरसः सिद्धा यक्षरक्षांसि चारणाः २६ भूतप्रेतपिशाचाश्च विद्याध्राः किन्नरादयः द
शैते विदुराख्याताः सर्गास्ते विश्वसृक्कृताः २७ अतः परं प्रवक्ष्यामि वंशान्मन्वंतराणि च २७ एवं रज
प्लुतः स्रष्टा कल्पादिष्वात्मभूर्हरिः सृजत्यमोघसंकल्प आत्मैवात्मानमात्मना २८ ॥१०॥

स्तूभयात्मकः देवसर्गश्च वैकृतत्वस्यानुषंगः वैकारिकः तद्देवसर्गः प्राकृतेषु पूर्वमेव प्रोक्तः अयं तु तामसा नत्वाद्वैकृतः देवसर्गोनान्तर्भूतश्च सनत्कुमारादीनां सर्गस्तु प्राकृतो वैकृतश्च देवत्वेन मनुष्यत्वेन च उभयात्मकः २५ वैकृतश्च देवसर्गोष्टविधः तत्र विबुधादयः त्रयो भेदाः गंधर्वाप्सरस एकः यक्षरक्षांस्येकः भूतप्रेतपिशाचा एकः सिद्धचारणविद्याधरा एकः किन्नरादय एकः आदिशब्दात् किंपुरुषाश्वमुखादयः

[illegible] ॥१०॥

तानेव सर्गान्प्रपंचयति आद्यस्त्वादिना यावदष्टादशभिः महतो लक्षणं आत्मनो हरेः सकाशाद्गुणा
नां वैषम्यमिति प्रथमः अहंकारस्य तस्य लक्षणं यत्रेति द्रव्यादयो यस्मात् तृतीयः सर्गः तन्मात्रो भूत
सूक्ष्मसर्ग इत्यर्थः द्रव्यमात्रमतो महाभूतोत्पादकः ज्ञानकर्मेंद्रियात्मकः चतुर्थः ॥१५ तमसः पंचपर्वाविद्या
याः अबुद्धिं जीवानामावरणविक्षेपौ अतः करोतीति बुद्धिकृतस्येश्वरस्य प्रभोः अबुद्धियोगेन आतत्वमारभ्य
द्विधा यामेथा समाहरतीति तस्याद्धा लोकालोकपर्यन्तमिति तम आदिसर्गा रजोभाज इति अलंरूपस्येत्यर्थः अस्मि
न्मते अबुद्धकृत इति प्रथमाने अनवधानकृत इत्यर्थः ॥१७ स्थावरमिव प्रथमं कृतो मुख्यसर्गः तस्थुषां स्या।

आद्यस्तु महतः सर्गो गुणवैषम्यमात्मनः । द्वितीयस्त्वहमो यत्र द्रव्यज्ञानक्रियोदयः ॥१४ भूतसर्गस्तृ
तीयस्तु तन्मात्रो द्रव्यशक्तिमान् । चतुर्थ ऐंद्रियः सर्गो यस्तु ज्ञानक्रियात्मकः ॥१५ वैकारिको देवस
र्गः पंचमो यन्मयं मनः । षष्ठस्तु तमसः सर्गो यस्त्वबुद्धिकृतः प्रभोः ॥१६ षडिमे प्राकृताः सर्गा वैकृ
तानपि मे शृणु । रजोभाजो भगवतो लीलेयं हरिमेधसः ॥१७ सप्तमो मुख्यसर्गस्तु षड्विधस्तस्थुषां
च यः । वनस्पत्योषधिलतात्वक्सारा वीरुधो द्रुमाः ॥१८ उत्स्रोतसस्तमःप्रायाः अंतःस्पर्शा विशेष
िणः । तिरश्चामष्टमः सर्गः सोऽष्टाविंशद्विधो मतः ॥१९ अविदो भूरितमसो घ्राणज्ञा हृद्यवेदिनः ॥२०

वनस्पत्यादीनां षड्विधत्वमेवाह ये पुष्पं विना फलंति ते वनस्पतयः ओषधयः फलपाकांताः लता आरोहणापेक्षाः
त्वक्सारा वेण्वादयः लता एव काठिन्येन आरोहणानपेक्षा वीरुधः ये पुष्पैः फलंति ते द्रुमाः ॥१८ तेषां साधा
रणं लक्षणमाह ऊर्ध्वं स्रोतः आहारः संचारो येषां ते तमःप्रायाः अव्यक्तचैतन्याः अंतःस्पर्शाः स्पर्शमेव जानंति
न बाह्यं तदंतरं स्वतो बहिर्विशेषणो अप्यवस्थिताः परिणाहरूपैकभेदवंतः तिर्यक्स्रोतसां सर्गमाह तिर
श्चामिति सत्वाष्टाविंशतिभेदाः तिरश्चां लक्षणमविदः श्वस्तनादिज्ञानशून्याः भूरितमसः आहारमात्रनिष्ठाः घ्रा
णेनैवेष्टमर्थं जानंतीति हृद्यवेदिनः दीर्घानुसंधानशून्याः तथा वक्ष्यतिभिः अपेक्षितं येषां पशूनां सशानापि पाके पञ्चम

भिन्नांतिभविमानांतप उपेक्षितवि ३ ... अंतःस्पर्शालिनीति ३८

श्री
भाग.
टी.
३९

कालभेदेन लोकसृष्टिभेदं श्रुत्वा तमेव कालं जिज्ञासुः पृच्छति यथेति कालाख्यं लक्षणं स्वरूपं आत्थ अब्रवीः कथं का
लः कल्पते किं वा तस्य स्वरूपमित्येतद्वर्णयेत्यर्थः ॥१०॥ तत्र साक्षात्मनः कालस्य स्वरूपमवाच्यत्वा
त्तद्व्याख्यातेन विशेषेण गुणव्यतिकराकार इत्यादि परिणामः येनैव व्यज्यते स कालः इति शेषः कल्पते च
कादृशः कर्यगुणव्यतिकरः कालः स्वभावः स्वतो निर्विशेषो निर्विशेषोऽप्रतिष्ठितः कार्यपर्यन्तमितः प्राप्य
तथा च सर्वः एतदेव स्पष्टयितुं पुरुष इत्यादि तेन कालेन निमित्तभूतेन करणेनोपादानं पुरुषः सृष्टिं पुनरीय
तेनिमित्ततया चाविक्रियते उपादानं निमित्तं यस्मिन्नात्मानं विश्वरूपेण असृजत तत्र कालस्य निरन्तरता स्पष्टा
भावात् तत्र च स्वरूपकथनमात्रं कालेन निमित्तेन वा सृजति तेनावद्येवोविवर्तितेन ॥११॥ व्यतिरिक्त सृजनाभावं दर्शय

विदुर उवाच । यथात्थ बहुरूपस्य हरेरद्भुतकर्मणः ॥ कालाख्यं लक्षणं ब्रह्मन् यथा वर्णय नः प्रभो ॥१०॥ मैत्रे
य उवाच । गुणव्यतिकराकारो निर्विशेषोऽप्रतिष्ठितः ॥ पुरुषस्तदुपादानमात्मानं लीलयासृजत् ॥११॥ वि
श्वं वै ब्रह्म तन्मात्रं संस्थितं विष्णुमायया ॥ ईश्वरेण परिच्छिन्नं कालेनाव्यक्तमूर्तिना ॥१२॥ यथेदानीं तथा
चाग्रे पश्चादप्येतदीदृशम् ॥ सर्गो नवविधस्तस्य प्राकृतो वैकृतस्तु यः ॥१३॥ कालद्रव्यगुणैरस्य त्रिविधः प्र
तिसंक्रमः ॥१४॥

कालस्य सृष्टिनिमित्ततां दर्शयति विश्वमिति विष्णुमायया संस्थितं संसृष्टं ब्रह्मतन्मात्रं ब्रह्मण्येव ईश्वरेण कर्त्रा
कालेन निमित्तेन परिच्छिन्नं पृथक्कृतं कीदृशेनाव्यक्ता मूर्तिः स्वरूपं यस्येति तेन निर्विशेषतां दर्शितम् ॥१२॥ अप्र
तिष्ठितमपि दर्शयितुं तेन कार्यविश्वप्रवाहस्याप्रतिष्ठितमाह । यथेदानीं संस्थितं तथाग्रे पूर्वमासीत् पश्चादपि भ
विष्यति एवं साक्षामानः कालेन निरूप्य विशेषतो निरूपयितुं तन्निमित्तस्य सर्गस्य पूर्वोक्तस्य भेदं तावद्दति
यस्तु प्राकृतो वैकृतश्च सर्गः तन्निमित्तमेव त्रिविधं प्रलयमाह । स च प्रलयः कालेन सन्ततप्रवाहरूपा सर्वे
षां भवति कालेन केवलेन नित्यः प्रलयः तद्द्रव्येन सकलस्यान्यादिनानैमित्तिकः गुणैः प्राकृत कार्यग्रसङ्गः

बा॰

सचोदितः प्रार्थितः हरिस्तथेत्याह न तेन प्रश्नात्तेन विस्मृतः स्मृतः ॥ २ ॥ आत्मनि श्रीनारायणो आत्मानं मनसा वेपप
४ अब्जसंभूतो ब्रह्मा यदपि श्रेष्ठायस्थितः कृतविक्रमः तस्य पद्मसंभवस्य त्रिलोक्यां भूतपञ्चमस्य तेन प्रलयका
लेन कृतवीर्यप्रदानेन वायुनापि तं मया पादितं मनसा तपः ५ विरुद्धवित्तानेव लघयस्य मयापात्मवीन
वान ६ पुष्करपत्रप्रवाल्लीनाल्लीलोका न्नालितास्म त्वामि ७ श्रीभगवतास्य एकत्र लोकं मे तिष्ठ
हितः नियुक्तः स तदा पद्मकोशाग्रे विश्वकर्मा भवेत् त्रिधा लोकत्रयं रूपेणाभगवाली द्विवभाजपेन
मलमुज्ज्वलेन कर्णलोकत्रयस्य हि तन्मध्ये भावनाया विततस्य विशालतमा मह द्विसमधाच तुर्दशा लोकाः

सुमतः ॥ एवं सचोदितस्तेन दूर्वाकोशायवामुनि ॥ प्रीतः प्रमाह तांसृष्टान् हरिस्थानपद्मभगवान् ३ मे ॥
त्रयः विरिंचो पितथा चक्रे द्विधावर्णा श्रान्ततपः आत्मन्यात्मानमावेश्य यदाह भगवानजः ४ नहि लो
का अब्जसंभूतो वायुना यत्र विष्ठितः पद्ममंभस्तत्काल कृतवीर्यप्राकाशित ५ तपसा ह्यात्मना तेन
विधुयाशान्तमस्थाया विवृद्धवित्तानवलोक्य पाङ्कुशं महद्भसा ६ तद्विलोक्य वियच्चापि पुष्करैय ह्रदैः
हिते अनेन लोका भुवर्लीना लोकालितासीत्यवितथस्य ७ पद्मकोशं तदाविश्य भगवत्कर्मचोदितः ॥
एकं व्यभाङ्क्षीद् उरुधा त्रिधा भाव्यं द्विसप्तधा ८ एतावान्जीवलोकस्य संस्थाभेदः समाहृतः धर्मस्य ॥

पाकः कथातलो पि वरूपकाले ताभ्यां भावेपि तयोस्य मतो ननेन त्रिलोकीकरणविक्रमस्पर्शः ८ त्रिलोकी हे
यतो वा विभागा हेतमा एतावांस्त्रिलोकीरूपः जीवलोकस्य जीवानां भोगस्थानस्य प्रमहः सरूपस्य सस्थाने
हो रचना विशेषात्मकः ननु परमेष्ठिनोपि जीवत्वाविशेषाद्वृत्ति लोकस्य किमिति प्रमाह स्तोष्टं न भवन्तितस्माद् इह
घुस्फटनिमित्तस्यानिष्कामस्य धर्मस्य विपाकः फलरूपो सौ उपलक्षणमेतत्सत्यलोकस्य महलोकस्य प्र भू
तीनां तत्कामिनामत्र लोकाः स्पर्शमह लोकस्य कर्मफलतात्पर्यन्तिकल्पान्तविनाशो भवतः महः प्रभृती
नांउपास्तनाम मुक्तिनां तत्रामुख्य धर्मफलतो हि पराथ पर्यन्तनाशाः नव स्थानान्यततः परं प्रायेण मुक्तिरिति भा

अत्र हेतुमाह अहमिति आत्मनामस्तकामोपाधीनां जीवानामात्मा अतः प्रेयसां प्रतिप्रियाणां मध्ये प्रेष्ठः प्रियतमः स
न्निवस्यः यत्कृते यदर्थं ४२ अतस्त्वत्कृतार्थं प्रवर्त्तयापि मां स्मरणार्थं स्रष्टुं प्रवर्तस्वेत्याह सर्वेति आत्मना मयि दत्तेन लोकाधा
मयत्वलक्षणेन तेजसा प्रजाः सृज नकेवलमात्मनैवास्मानिरपेक्षत्वात्तत्र तापकत्वाभावमाह सर्ववेदमयेनेति आत्मना प्र
जायोनिः कारणाय मत्तिरवलम्बयाशास्ति निःशयसूचयति यथापूर्वमिति तनया यावा याः प्रलये मयि अनुशेरते

अहमात्मात्मनां धातः प्रेष्ठः सन्प्रेयसामपि अतो मयि रतिं कुर्याद्देहादिर्यत्कृते प्रियः ४२ सर्ववेदमये
नेदमात्मनात्मात्मयोनिना प्रजाः सृज यथापूर्वं याश्च मय्यनुशेरते ४३ मैत्रेय उ० तस्मा एवं जगत्स्र
ष्ट्रे प्रधानपुरुषेश्वरः व्यज्येदं स्वेन रूपेण कञ्जनाभस्तिरोदधे ४४ इति श्रीभागवते तृतीयस्कन्धे पद्मोद्भ
वे विदुरमैत्रेयसंवादे नवमोऽध्यायः ९ विदुर उवाच अन्तर्हिते भगवति ब्रह्मा लोकपितामहः प्रजाः स
सर्ज कतिधा दैहिकीर्मानसीर्विभुः १ ये च मे भगवन्पृष्टास्त्वय्यर्था बहुवित्तम तान्वदस्वानुपूर्व्येण छि
न्धि नः सर्वसंशयान् २ ॥

तिष्ठितानां मभिव्यक्तिमात्रमेव कर्तव्यमित्यनायासत्वमुक्तं ४ इदं स्वरूपं व्यज्य प्रकाश्य पद्मनाभस्तिरोदधे श्रीना
रायणो रूपेणादर्शनोऽभवत् ४४ इति श्रीभावार्थदीपिकायां तृतीये नवमोऽध्यायः ९ दशमे कालसंप्रश्नप्रतिवक्तृ
तं तत्त्वः प्राकृतादिविभागेन सर्गस्त्वदशधोच्यते सर्गयावदस्त्वंदस्मादस्य स्त्रीति वा २ ॥
॥ ॥

यतो वर्षीयान् वृद्धतमोऽत्यधिकोऽस्तीत्यर्थः ३४ मदनुग्रहमेवाह ऋषिमिति चतुर्भिः यद्यतस्ते मयि मनो निर्व
द्धं ३५ यद्यस्मात् त्वं निर्विशेषैः गुणैः सत्वादिभिः आत्मनाहंकारेण वायुक्तं मन्यसे ३६ तुभ्यं त्वन्नालेन मार्गेण पु
ष्करस्य कमलस्य मूलमधिष्ठानं सलिले विचिन्वतो मयि विचिकित्सायां भवितव्यं प्रथमा अप्रथमा न च दृष्टं ततो
स्तिनात्मीनिमद्देहे मतिः आत्मा स्वरूपं मे मया अवहितं न हि दर्शितः ३७ अंगहे ब्रह्मन् यत्कर्णकृतवानसि मत

नानाकर्मवितानेन प्रजा बह्वीः सिसृक्षतः नात्मावसीदत्यस्मिंस्ते वर्षीयान्मदनुग्रहः ३४ ऋषिं मा द्यं
न बध्नाति पापीयांस्त्वां रजोगुणः यन्मनो मयि निर्वद्धं प्रजाः संसृजतोपि ते ३५ ज्ञातोहं भवता त्वद्य दु
र्विज्ञेयोपि देहिनां यन्मां त्वं मन्यसेऽयुक्तं भूतेंद्रियगुणात्मभिः ३६ तुभ्यं मद्विचिकित्सायामात्मा
मे दर्शितो वहिः नालेन सलिले मूलं पुष्करस्य विचिन्वतः ३७ यच्चकर्थांग मत्स्तोत्रं मत्कथाभ्युद
याङ्कितं यद्वा तपसि ते निष्ठा स एष मदनुग्रहः ३८ प्रीतोहमस्तु भद्रं ते लोकानां विजयेच्छया य
दस्तौषीद्गुणमयं निर्गुणं मानुवर्णयन् ३९ य एतेन पुमान्नित्यं स्तुत्वा स्तोत्रेण मां भजेत् तस्या
शु संप्रसीदेयं सर्वकामवरेश्वरः ४० पूर्तेन तपसा यज्ञैर्दानैर्योगसमाधिना राद्धं निःश्रेयसं पुंसां मत्प्री
तिस्तत्त्वविन्मतं ४१ ॥

स्तोत्राभ्युदयः तेनांकितं स एष एवं वाभावः मयि मनो निर्बंधः मज्ज्ञानं मद्रूपस्य दर्शनं स्वस्तुतिः तपो निष्ठ
वेति यः स एव सर्वोपि मदनुग्रहः ३८ गुणमयत्वेन प्रतीयमानं मामपि निर्गुणमेवानुवर्णयते ३९ तव प्रीतेरति
किं वक्तव्यमित्याह य इति ४० न च मत्प्रीतेरप्यधिकं किंचिदस्तीत्याह पूर्तादिभिः राद्धं निःश्रेयसं फलं तन्मत्प्री
तिरेवेति तत्त्वविदां मतं ४१ ॥

स्वसम्भवं स्वोद्भवस्थानं तपः विद्या उपासना समाधिरेकाग्रता तैर्निशाम्य दृष्ट्वा यथाशक्ति स्तुत्वा श्रान्त इव वि
रराम २६ आत्मनो लोकसंस्थानविज्ञाने परिखिद्यतो ब्रह्मणोऽभिप्रेतमभिलाषं तमाह देहिन्ह्योवत्वथः तेन प्रल
योदकेन विषण्णचेतसं कश्मलं मोहं शमयन्निव तमः तमो हशमनं दर्शयन्निति २८ हे वेदगर्भ तन्द्रीं विषादं कृत मा
लस्यं मा गाः तेनैव सर्गो मया अनुग्रहादिः मया यत्प्रार्थयसे तत्पूर्वमेव सम्पादितं २९ नहि केवलमहं न ज्ञानामी

श्रीमैत्रेय उ० स्वसम्भवं निशाम्यैवं तपोविद्यासमाधिभिः यावन्मनोवचः स्तुत्वा विरराम स खिन्नवत्
२६ अथाभिप्रेतमन्वीक्ष्य ब्रह्मणो मधुसूदनः विषण्णचेतसं तेन कल्पव्यतिकराम्भसा २७ लोकसं
स्थानविज्ञान आत्मनः परिखिद्यतः तमाहागाधया वाचा कश्मलं शमयन्निव २८ श्रीभगवानुवा
च मा वेदगर्भ गास्तन्द्रीं सर्ग उद्यममावह तन्मयापादितं ह्यग्रे यन्मां प्रार्थयते भवान् २९ भूयस्त्वं त
प आतिष्ठ विद्यां चैव मदाश्रयां ताभ्यामन्तर्हृदि ब्रह्मँल्लोकान्द्रक्ष्यस्यपावृतान् ३० तत आत्मनि लोके च
भक्तियुक्तः समाहितः द्रष्टासि मां ततं ब्रह्मन्मयि लोकांस्त्वमात्मनः ३१ यदा तु सर्वभूतेषु दारुष्व
ग्निमिव स्थितं प्रतिचक्षीत मां लोको जह्यात्तर्ह्येव कश्मलं ३२ यदा रहितमात्मानं भूतेन्द्रियगुणा
शयैः स्वरूपेण मयोपेतं पश्यन्स्वाराज्यमृच्छति ३३ २॥

त

न्याह भूय इति ३० भक्तियुक्तः समाहितः सन् आत्मनि अस्मिँल्लोके च मां ततं व्याप्य स्थितं द्रष्टासि द्रष्टासि
आत्मनो जीवांश्च ३१ सर्वत्र समदर्शनेन मोहो निवर्तते इत्याह यदेति प्रतिचक्षीत पश्येत ३२ तथा च मिथ्या
तानतिष्ठतो मुच्यते इत्याह यदेति भूतादिभिर्विरहितमात्मानं जीवं शुद्धं त्वंपदार्थं स्वरूपेणात्मस्वरूपेण भूतेन मया
तत्पदार्थेनोपेतमेकीभूतं पश्यन्भवति तदा स्वाराज्यं मोक्षं प्राप्नोति ३३ ॥

पंचस्तनाप्रार्थयते सोयमिति चतुर्भिः प्रार्थयेन सत्वेन तानेन भगेनैश्वर्येण च मृडयते सुखयति तेनैव दृशं ज्ञानं मे अ
नुस्पृशतां योजयतु यथाहं स्रक्ष्यामि सृष्टामि भविष्यामि यतः प्रणतप्रियोसौ प्रणतानामिहैवाहरिः प्रवेशः प्रणतः नचा
मः प्रार्थनीयोस्तियतः सएव समस्तजगतां सुहृत्तयानेसौ एको नुस्पृशतु आत्मा अंतर्यामी २२ आत्मशक्त्याम
मया सह यद्यत्कर्म करिष्यति तस्मिन्स्वविक्रमं विस्तारं वा विक्रमः ९ भावो वा सिसृक्षतः इदं विश्वं सृजतोपि मे
चेतः सएव युंजीत प्रवर्तयतु कर्माशक्ति तत्कृतं शमलं च वैषम्यादि पापं यथा विजह्यां यथाहं त्यजामि २३

पः

सोयं समस्तजगतां सुहृदेक आत्मा सत्वेन यन्मृडयते भगवान्भगेन तेनैव मे दृशमनुस्पृशतां यथाहं स्र
क्ष्यामि पूर्ववदिदं प्रणतप्रियोसौ २२ एष प्रपन्नवरदो रमयात्मशक्त्या यद्यत्करिष्यति गृहीतगुणाव
म॰टी॰३ तारः तस्मिन्स्वविक्रम इदं सृजतोपि चेतः युंजीत कर्म शमलं च यथा विजह्यां २३ नाभीह्रदादिह
सतोंभसि यस्य पुंसो विज्ञानशक्तिरहमासमनंतशक्तेः रूपं विचित्रमिदमस्य विवृण्वतो मे मारी
रिषीष्ट निगमस्य गिरां विसर्गः २४ सोसावदभ्रकरुणो भगवान्विवृद्ध प्रेमस्मितेन नयनांबुरुहं
॰ विजृंभन् उत्थाय विश्वविजयाय च नो विषादं माध्व्या गिरापनयतात्पुरुषः पुराणः
२५ २॥

प्रेमस्मितेन यस्य नाभिह्रदादिहासं विज्ञानेशक्तिर्यस्य महतनंतात्मकस्य विज्ञस्य तदभिमानी अस्यारूपमि
दं विश्वं विस्तारयतो मे निगमस्य प्रवर्तभूतानां गिरां विसर्गः उच्चारणं मारीरिषीष्ट हलतां मा गलतु वचः सोमिति
नाथेनमात्तुप्यतामित्यर्थः २४ विवृद्धप्रेमास्मितेन विजृंभयन् विश्वस्य विजयाय विश्वोद्भवाय च नो विषादं
अस्मद्दुर्ग्रहायोत्थाय २५ ॥

इदानीं तत्कालं भाविलीलावतारकर्माणि दर्शयन्नाह तिर्यगादिषु जीवयोनिषु स्वेच्छया स्वीकृतमूर्तिः स्वस्वकृत
धर्ममर्यादापालनेच्छया रेमे वस्तुतः स्वानन्दानुभावेनैव निवृत्तविषयस्पृहो ऽपि यो तस्मै श्रीपुरुषोत्तमाय नमः ननु पापिधर्मा
सस्य पालनं तु कर्तुं गीतासु यस्मात्क्षरमतीतो ऽहमक्षरादपि चोत्तमः अतो ऽस्मि लोके वेदे च प्रथितः पुरु
षोत्तमः इति १९ इदानीं स्वपमानामेव मूर्तिं प्रणमति यो ऽविद्ययेति अविद्यया दशार्धाः पञ्च वृत्तयो यस्याः तया वि
द्यया निद्राहेतुभूतया अनभिभूतो ऽपि यो निद्रामुवाह तस्मै नमः इत्युत्तरेणान्वयः जठरीकृता उदरे प्रविलापिता लो
कयात्रा लोकस्थितिर्येन अहिरेव कशिपुः शय्या तस्याः स्पर्शो ऽनुकूलो यस्यास्तां निद्रां भीमा नाना ऊर्मीणां मा

तिर्यङ्मनुष्यविबुधादिषु जीवयोनिष्वात्मेच्छयात्मकृतसेतुपरीप्सया यः रेमे निरस्तरतिरप्यवरुद्ध
देहस्तस्मै नमो भगवते पुरुषोत्तमाय १९ यो ऽविद्ययानुपहतो ऽपि दशार्धवृत्त्या निद्रामुवाह जठरीकृत
लोकयात्रः अन्तर्जले ऽहिकशिपुस्पर्शानुकूलां भीमोर्मिमालिनि जनस्य सुखं विवृण्वन् २० यन्नाभि
पद्मभवनादहमासमीड्य लोकत्रयोपकरणो यदनुग्रहेण तस्मै नमस्त उदरस्थभवाय योगनि द्रा
वसानविकसन्नलिनेक्षणाय २१ ॥

ला विद्यते यस्मिन्नन्तर्जले निद्राणस्यापि विवेकिनो जनस्य निद्रासुखमीदृगिति विवृण्वन् दर्शयन् उपहसति
स्पर्शः अनन्तजलादिविशेषणानि यद्वा पूर्वकल्पश्रान्तस्य जनस्य विश्रामसुखं विवृण्वन् स्फोरयन् जनतत्परी
पकारायेत्यर्थः सहमपि इः रेमे ऽभ्यमितिध्यातनार्थानि विशेषणानीति २० किं च यस्य नाभिपद्ममेव भवनं गृहं
तस्माल्लोकत्रयमुपकरणं यस्य स ऽहं लोकत्रयस्य स्रष्टा दिव्यारम्भको ऽभूवमिति न मन्तव्यं तादृशो ऽहं यदनुग्रहेणासं
उदरे स्थितो भवः संसारः प्रपञ्चो यस्य योगनिद्रावसाने किंचिद्विकसन्नलिनवदीक्षणे यस्य २१ ॥

मत्र गुणावतारकर्माणि दृष्ट्वा श्रमनिवृत्त्यै एक स्त्रिपात्रयः पाटः । स्कंधा यस्य प्रपेक्तुरवः प्ररोहाः शाखा
वादैः द्वारभूतैः न निश्चितं हरेः कथायां गृहीता नीता तदुक्तमितिहाससमुच्चये कामिनो वर्णयन् कामाल्लोभं ल
ब्धस्य वर्णयन्नरः किं फलमाप्नोति नृपं धर्मविपानतत्र लोकविनाशनार्थं वर्णयित्वा तेन ततो इतिहासे च
विद्यार्थैः पुनरन्येवमिदितो अन्यथा चोरस्तैः संसारबन्धहेतूजनस्य तौ वर्णयित्वा कथं विद्धान् महाकारुणिको मु

मुनिर्विविक्तश्रुतिर्भगवद्गुणानां संख्यापिते भारतमाह कृष्णः । यस्मिन्नृणां ग्राम्यसुखानुवादैर्मतिर्गृही।
ता नु हरेः कथायां ॥ १२ ॥ सा श्रद्धयानस्य विवर्धमाना विरक्तिमन्यत्र करोति पुंसः । हरेः पदानुस्मृतिनि
र्वृतस्य समस्तदुःखाप्ययमाशु धत्ते ॥ १३ ॥ तानन्वशोच्यशोच्यानविदोऽनुशोचे हरेः कथायां विमुखान
घेन क्षिणोति देवोऽनिमिषस्तु येषामायुर्वृथावादगतिस्मृतीनां ॥ १४ ॥ तदस्य कौषारव शर्म
दातुर्हरेः कथामेव कथासु सारं उद्धृत्य पुष्पेभ्य इवार्तबन्धो शिवाय नः कीर्तय तीर्थकीर्तेः ॥ १५ ॥

निरिति ॥ १२ ॥ हरिकथायां मतिप्रवेशस्य फलमाह सा कथामतिर्वा अन्यत्र ग्राम्यसुखे ततः किमत आह
हरेरिति ॥ १३ ॥ एवंभूतायां कथायां ये न रमन्ते तानन्वशोचति शोच्या ये तेषामपि शोच्यास्तत्त्वाविदः भारतादयो
न भिज्ञानन्वशोच्यान् ये न ज्ञात्वा हरेः कथायां विमुखाः तानन्ते तेषामपि शोच्यान् इति योऽयमनिमिषः कालो
येषामायुः क्षपयति अत्र हेतुः वृथैव वादगतिस्मृतयो वाग्देहमनोव्यापारः येषां ॥ १४ ॥ ततस्माद्धे कौशा।
रव अस्य विश्वस्य शिवाय कथासु सारभूतां हरेः कथामेवोद्धृत्य नः कीर्तय यथा पुष्पेभ्यो मधुकरः मधुपः उद्धरति

पुनर्विशेषं प्रभुमोऽत्र कथमाविष्करोति ॥ सुश्लोकाः पुण्यकीर्तयः तेषां मौलिर्विवाधिकेन विराजमानाः त ।
स्मिन्नर्थः लोकनाथाधिपतिः अलोकालोकालोकपर्वताद्बहिर्गतान् अचीकॢपत् कल्पयामास ॥ यत्र येषु ।
सर्वाणि यानि सत्वानि तेषां निकायस्तेषां भेदः तत्र तत्कर्माधिकारी आश्रित इति वा ॥ उतापि च येन प्रकारे
ण प्रजानां जीवानामात्मा स्वभावः तत्कृतेन कर्म तत्कृतेन रूपेण तत्कृता अभिधाः तासां भेदं कृतवान् ॥ विश्वसृष्टा स्व

६९ मनोनु त्वय्यपि स्पृशन्ति नः सुश्लोकमौलेश्चरितामृतानि ॥ येस्तत्त्वभेदैरधिलोकनाथो ॥ लो
कानलोकान् सह लोकपालान् ॥ ५ ॥ अचीकॢपद्यत्र हि सर्वसत्वा ॥ निकायभेदोधिकृतः प्रतीतः ८
येन प्रजानामुत आत्मकर्म ॥ रूपाभिधानां च भिदां विधत्ते ॥ नारायणो विश्वसृगात्मयोनि ॥ रेतच्च
नो वर्णयितुं प्रवर्य ॥ ५ ॥ यत्रावरेषां भगवद्व्रतानि ॥ स्कंदानि मेव्यास सुखोद्भवीदम् ॥ अत्तमुम
स्तेऽकुसखावहानां ॥ तेषामस्ते कुतकथास्तैनोच्चात् ॥ ७ ॥ कस्तत्सुयात्तीर्थपदोभिधानात् ॥ स
त्वेषु यः सूरिभिरीड्यमानात् ॥ यः कर्णनाडीपुरुषस्य यातो ॥ भवप्रदीगो हरति भिनत्ति ॥ ८ ॥ ॥ छिन्नति

यस्मात् आत्मयोनिः स्वतः सिद्धः ॥ ५ ॥ ननु महाभारते त्वया सर्वं श्रुतमेव तत्राह परे त्ववर्णिकाः अवरेषु शूद्राद
यः तेषां व्रतानि यमाः मेमयाश्रमी दानं पुनः पुनः तेषां श्रवणान् अत्तमुम उत्तमाः सन्ति तेषां तदकुसखावहत्वा
त् ॥ यस्त तत्र श्रीकृष्णकथास्तोत्रैः सूचितः ॥ तस्मात् एतत्तत्र वलेतु ह्रिर्नास्ती स्पर्शः ॥ ७ ॥ न च हेतुः क इति
तीर्थपदः कृष्णस्य अभिधानात् कथास्ततात् ॥ सत्वेषु समाजेषु सूरिभिर्नारदादिभिः ॥ ५ २

श्री॰
भा॰ ल॰
टी॰
१५

ग्रस्तानेवाह । तैः कर्मभिः सुखं चान्यस्तु दुःखस्योपशमं चेमर्थः । अथवा अन्नदानं विंदते किं तद्दियपेक्षायां तत्सेवनि
दृशाः तु सार्वसमं चेति ततः तैः कर्मभिः पुनः पुनः दुःखमेव विंदेत अत एवं विधे संसारे नोऽस्माकं यत्फलं कर्तव्योऽयमतस्त
त्तो भगवानाह देत निरूपयति ॥ २ ॥ हे वाव्या चीनात्कर्मणो निमित्तभूतात् कस्मादि हि सुखस्यात्र : सुदुःखितस्य जनस्य ।
अनुग्रहाय भव्यानि मंगलानि भवंतः परोपकारस्वभावा एव न स्वार्थः ॥ ३ ॥ तत्तस्मात् हे साधवः वर्यो सुखदं पेनः आदिश
कथयत येन वर्त्मना संराधितोऽहं दिविस्थितः सन् तत्त्वाधिवास आत्मापो वोऽस्तं तन्मे हि तं पुराणं च अनादि वेद प्रमाणं

विदुर उवाच ॥ सुखाय कर्माणि करोति लोको न तैः सुखं वान्यदुपारमं वा । विंदेत भूयस्तत एव दुःखं यदत्र यु
क्तं भगवान्वदेन्नः ॥ २ ॥ जनस्य कृष्णाद्विमुखस्य दैवादधर्मशीलस्य सुदुःखितस्य । अनुग्रहायेह चरंति
नूनं भूतानि भव्यानि जनार्दनस्य ॥ ३ ॥ तत्साधुवर्यादिश वर्त्म शं नः संराधितो भगवान्येन पुंसां । हृदि
स्थितो यच्छति भक्तिपूते ज्ञानं सतत्त्वाधिगमं पुराणम् ॥ ४ ॥ करोति कर्माणि कृतावतारो यान्यात्मतंत्रो भग
वांस्त्र्यधीशः । यथा ससर्जाग्र इदं निरीहः संस्थाप्य वृत्तिं जगतो विधत्ते ॥ ५ ॥ यथा पुनः स्वे ख इदं निवे
श्य शेते गुहायां संनिरुद्धवृत्तिः । योगेश्वराधीश्वर एक एतदनुप्रविष्टो बहुधा यथासीत् ॥ ६ ॥ क्री
डन्विधत्ते द्विजगोसुराणां क्षेमाय कर्माण्यवतारभेदैः ॥ ७ ॥ २ ॥
टी॰ ४ करोति कर्माणीत्यादिना वर्णाय
तिपंचमश्लोके क्रियासंबंधः । यथा येन प्रकारेण गुरुरूपेण कृतावतारः सन् त्रिगुणात्मा यानि येन अतःस्वतं
त्र एव यानि कर्माणि करोति ॥ ५ ॥ कर्माण्येव विशिनष्टि यथेत्यादिना निरीहो निष्क्रियोऽपि निःस्पृहो वा अस्य
जगतः स्थितिकृता वृत्तिं जीविकां ॥ ५ ॥ स्वे खे हृदाकाशे निवेश्य स्थापयित्वा निवृत्ता वृत्तयो यस्य गुहायां योगमा
यायां बहुधा ब्रह्मादिरूपेण ॥ ६ ॥ मत्स्याद्यवतारभेदैः क्रीडन्यानि यथा कर्माणि विधत्ते ॥ ७ ॥ ८ ॥ राम १५

कार्हंकीटकवनुच्छकवकामण्यवारिधिः सता हंतेनाचरतमसमूर्धकेशवं यथा ३६ तुरिमूल ६

मय्युपरते सति ज्ञानमर्हति ज्ञानयोग्यो भवति ३० मत्तः अल्पकामाद्यदपि न्यूनो न भवति यच यस्मात् गुणैर्नार्दितोभि
तः मद्विषयं ज्ञानं लोकस्यापादयितुं ३१ एवमतेनाभिप्रायेण शब्दयोनिना ब्रह्मकर्त्रा ईजे पूजयामास ३२ श्रु
तत्वानां विक्लवात्मनामधीरचित्तानां ३४ मनसेक्षितं चिंतितं ३५ कालिंद्याः सकाशात् सिद्धः एव विदुरः कति
पयैः दिनैः स्वः सरितं गंगां प्रापद्यत प्राप्तः ३६ इति श्रीभावार्थदीपिकायां तृतीयस्कंधे चतुर्थोऽध्यायः ४ पंचमे

अस्माल्लोकादुपरते मयि ज्ञानं मदाश्रयं अर्हत्युद्धव एवाद्धा संप्रत्यात्मवतां वरः ३० नोद्धवोऽण्वपि मन्
न्यूनो यद्गुणैर्नार्दितः प्रभुः अतो मद्वयुनं लोकं ग्राहयन्निह तिष्ठतु ३१ एवं त्रिलोकगुरुणा संदिष्टः
शब्दयोनिना बदर्याश्रममासाद्य हरिमीजे समाधिना ३२ विदुरोऽप्युद्धवाच्छ्रुत्वा कृष्णस्य परमात्म
नः क्रीडयोपात्तदेहस्य कर्माणि श्लाघितानि च ३३ देहन्यासं च तस्यैवं धीराणां धैर्यवर्धनम्
अन्येषां दुष्करतरं पशूनां विक्लवात्मनां ३४ आत्मानं च कुरुश्रेष्ठ कृष्णेन मनसेक्षितं ध्यायन् गते
भागवते रुरोद प्रेमविह्वलः ३५ कालिंद्याः कतिभिः सिद्धः अहोभिर्भरतर्षभ प्रापद्यत स्वःस
रितं यत्र मित्रासुतो मुनिः ३६ इति श्रीभागवते तृतीयस्कंधे चतुर्थोऽध्यायः ४ श्रीशुकः द्वारि द्युनद्या
ऋषभः कुरूणां मैत्रेयमासीनमगाधबोधम् क्षत्तोपसृत्याच्युतभावशुद्धः पप्रच्छ सौशी
ल्यगुणाभितृप्तः १ २

भगवल्लीलां तत्र दृष्ट्वा महामुनिः प्रोवाच महदादीनां सर्गं तिस्रु हरेः स्तुतिं उक्तः चतुर्भिरध्यायैः तत्र मैत्रेयसं
गमः संवादः तत्तयोः स्कंधद्वयेनाथ निगद्यते एतेन यावां गायाद्वा विद्वारे आसीनं तत्कर्मर्ष्यग्र तत्र हेतव
गाधापरिच्छिन्नो बोधो यस्य तं मैत्रेयं सौशील्यमार्जवादिगुणाः श्रीकृष्णादयः तैरभितृप्तः पाठांतरे अ
तितृप्तस्तं मैत्रेयम् १ २

श्री०
भाग०
टी०
१५

न्रदुपदेशोपदेवमूर्तंतीव्रदुःखंदीर्घमाकल्पांतेतेपातेतपःचेवरत्नविनयार्थंलोकभावनेलोकानुग्रहकारकौ २२ ज्ञाने
नविवेकेन २३ विस्रंभात् विश्वासात् २४ यद्यस्मात्त्वम्भूतप्रयोजनसाधकाःसंतःचरंतिनहितेषांकृतार्थानामस्म
त्कृतमस्त्यर्थः २५ तत्त्वायसंराध्यइतिअयंभावःभागवतेतुब्रह्मणामाचेणातत्वतत्त्वमुपदिष्टम्अर्थकेवलमसंभवा
दितिज्ञातव्यज्ञानीकश्चिदाराध्योमैत्रेयोनत्वहममातिकएवत्वतुपदेशोतस्मादिष्टत्वादिति २६ प्लावितोपनीतःउ

शुकउवाच प्रस्तुत्वाउपाकर्ण्यसुहृदांदुःसहंवधं ज्ञानेनाशमयत्प्राज्ञःशोकमुत्पतितंबुधः २३ सतंम
हाभागवतंव्रजंतंकौरवर्षभः विस्रंभादभ्यधत्तेदंमुख्यंकृष्णपरिग्रहे २४ विदुरः ज्ञानंपरंस्वात्मरहःप्र
काशंयदाहयोगेश्वरईश्वरस्ते वक्तुंभवान्नोर्हतियद्धिविष्णोर्भृत्याःस्वभृत्यार्थकृतश्चरंति २५ उद्धवः
ननुतेतत्त्वसंराध्यऋषिःकौषारवोंतिके साक्षाद्भगवतादिष्टोमर्त्यलोकंजिहासता २६ शुकः इतिस
ज्ञा१ सुधयेहविदुरेणविश्वमूर्तेर्गुणकथया प्लावितोरुतापः क्षणमिवपुलिनेयमस्वसुस्तां समुषितऔपग सैन्यपेषु २
विर्निशांततोगात् २७ राजः निधनमुपगतेषुवृष्णिभोजेष्वधिरथयूथपयूथपेषुमुख्यः सतुकथ
मवशिष्टउद्धवोय द्धरिरपितत्यजआकृतिंत्र्यधीशः २८ शुकः ब्रह्मशापापदेशेनकालेनामोघवां
छितः संहृत्यस्वकुलंनूनंत्यक्ष्यन्देहमचिंतयत् २९ ॥

त्तापोयस्ययमस्व सूर्यसुतायाःपुलिनेतीरेतांनिशांक्षणमि
वसमुषितःऔपगविरुद्धवः २७ ब्रह्मशापेननिधनंप्राप्तेषुयतस्मात्त्रयाणांब्रह्मादीनांईशोहरिरपि
आकृतिंमनुष्याकारंत्यक्तवान् २८ ब्रह्मशापअपदेशोमिषंयस्यतेनकालेनस्वशक्तिरूपेण अमोघवां
छितयस्मानसत्यशापःप्रभुःकिंनभगवदिच्छैवेत्यर्थः २९ २॥ १५

प्रवर्त्तमानाचरणं दर्शयति कर्माणीति अनीहस्य निष्क्रियस्य निस्पृहस्य वा अभवस्य अजन्मनो नभवो जन्म कालात्मनः त
वारिभयाद्दुर्गाश्रयः पलायनं च स्वात्मनिरतिर्यस्य तस्य बह्वीभिः स्त्रीभिः सह स्त्राश्रय इति स्त्रीगृहस्थाश्रम इति यत
इहास्मिन्विषये विदुषामपि धीः संशयेन खिद्यति १६ किंच मंत्रेषु यत्त्वं मत्तः समाहूय अहो पृच्छेः पृष्टवान्
अकुंठितः कालादिना अखंडः सन्ततः सदात्मा सत्यमादिसहितो बोधो विद्या यस्य कर्यस्य मुग्ध इवाप्रमत्तः अप्रम।

कर्माण्यनीहस्य भवोभवस्य ते दुर्गाश्रयोथारिभयात्पलायनं कालात्मनो यत्प्रमदायुताश्रयः स्वात्मन्
रतेः खिद्यति धीर्विदामिह १६ मंत्रेषु मां वा उपहूय यत्त्वमकुंठिताखंडसदात्मबोधः पृच्छेः प्रभो मु
ग्ध इवाप्रमत्तः तन्नो मनो मोहयतीव देव १७ ज्ञानं परं स्वात्मरहःप्रकाशं प्रोवाच कस्मै भगवान्स
मग्रं अपि क्षमं नो ग्रहणाय भर्तर्वदांजसा यद्वृजिनं तरेम १८ इत्यावेदितहार्दाय मह्यं स भगवान्प
रः आदिदेशारविंदाक्ष आत्मनः परमां स्थितिं १९ स एवमाराधितपादतीर्थादधीततत्त्वात्म
विबोधमार्गः प्रणम्य पादौ परिवृत्य देवमिहागतोहं विरहातुरात्मा २० सोहं तद्दर्शनाह्लादवि
योगार्तियुतः प्रभो गमिष्ये दयितं तस्य बदर्याश्रममंडलम् २१ यत्र नारायणो देवो नरश्च भ
गवानृषिः मृदु तीव्रं तपो दीर्घं तेपाते लोकभावनौ २२ ॥

मत्तः अवहितः सन् १७ स्वात्मनः न वरहः रहस्यं तत्त्वं तस्य प्रकाशकं कस्मै ब्रह्मणे सर्वनामत्वमार्षितः अ
स्माकं ग्रहणाय अपि क्षमं यदि योग्यं तर्हि वद हे भर्तः स्वामिन् यया यतः संसारदुःखमनायासेन तरिष्यामः १८ आ
वेदितो हार्दो हृदिस्थो अभिप्रायो येन तस्मै १९ आराधितपादो भगवान् स एव तीर्थं गुरुः तस्मादधीतः प्राप्तः त
त्त्वात्मविबोधस्य परमार्थात्मज्ञानस्य मार्गो येन देवं परिहृत्य प्रदक्षिणीकृत्य २० दर्शनेनाह्लादः वियोगेना।

तेमनसीप्सितंब्रह्मंतःस्थोवेदवेद्मि दानेहेतुः विश्वस्रजांवसूनांचमिलित्वा हेवसो इतिपुरापूर्वजन्मनित्वंवसुरभूःत
दामत्प्राप्तिकामेनत्वयाअहमिष्टः अतस्तेनस्वार्थंददामिदास्याम्यग्रेमर्त्यत्यागात्पूर्वमित्यर्थः ॥११॥ तस्यभाग्यमभिनंद
ति सएषसेवाजन्म तेभवानांमध्येचरमः यतयस्मिन्मदनुग्रहः आसादितोलब्धः यस्मान्मांरहस्येकांतेविषदा
नुवृत्त्याएकांतभक्त्यादृष्टवान्दृष्टवानसिएतद्दिष्ट्याभद्रंजातमित्यर्थः नृलोकान्नृणांलोकान्जीवांस्तद्वालोकानुत
सृजंतंवैकुंठंगच्छंतमित्यर्थः ॥१२॥ ददामीतियदुक्तंपुरातदेवनिर्दिशति पुरापूर्वस्मिन्पाद्मकल्पेआदिसर्गेपद्म

साधो

श्रीभगवानुवाच वेदाहमंतर्मनसीप्सितंतेददामियत्तद्दुरवापमन्यैः सत्रेपुराविश्वसृजांवसूनांमत्सि
द्धिकामेनवसोत्वयेष्टः ॥११॥ सएषवासाचरमोभवानामासादितस्तेमदनुग्रहोयत् यन्मांनृलोकान्
रहउत्सृजंतंदिष्ट्याददृश्वान्विषदानुवृत्त्या ॥१२॥ पुरामयाप्रोक्तमजायनाभ्येपद्मेनिषण्णायममादिस
र्गे ज्ञानंपरंमन्महिमावभासंयत्सूरयोभागवतंवदंति ॥१३॥ इत्यादृतोक्तःपरमस्यपुंसःप्रतिक्षणा
नुग्रहभाजनोहं स्नेहोत्थरोमास्खलिताक्षरस्तंमुंचन्शुचःप्रांजलिराबभाषे ॥१४॥ कोन्वीशतेपाद
सरोजभाजांसुदुर्लभोर्थेषुचतुर्ष्वपीह तथापिनाहंप्रवृणोमिभूमन्भवत्पदांभोजनिषेवणोत्सुकः
॥१५॥

मेममहिमालीलाअवभासतेयेनतत् ॥१३॥ इत्येवमादृतस्त्थामादुक्तस्याहं प्रतिक्षणंकृपावलोकएवा
अनुग्रहः तस्यभाजनः पात्रभूतः पावनत्वेप्रतिक्षणमनुग्रहस्यपात्रमिति शुचः अस्रूनिमुंचन् आबभाषेउ
क्तवानस्मि ॥१४॥ नहित्वांजानतीतिवृत्तिमात्रकामोहंकिंतुत्वन्निषेवणोत्सुकइत्यर्थः नचपिवाचटस्मानोचैवंसा
दृष्टामेमाहाभवति अतस्त्वत्तत्त्वज्ञानंदेहिइतिप्रार्थयितुमाह कोन्विति चतुर्षुधर्मादिषुतथापिनाहंनप्र

तृतीयाध्याय
प्रथमपाठः
श्लोक १५

नवान्यस्तूपायः प्रभवति किं तं मध्वा मध्वामदः सर्वतो मदः तेनाताम्रविलोचनानामेषां विवादो यदा भविष्यति तदा इयानेवैषां वधोपायः अतोऽन्यो नास्ति एकाकिनोऽपि मय्युद्यते सति स्वयमेव विवादेनान्तर्धीरस्मिन्नर्थः १५ एवं श्लोकद्वयेनोक्तक्रमेण संचिंत्य स्वराज्ये स्थापयित्वा १६ धृतः रक्षितः १७ अनुजैः सह १८ सांख्यप्रकृतिपुरु

मिथो यदैषां भविता विवादो मध्वामदाताम्रविलोचनानां नैषां वधोपाय इयानतोऽन्यो मय्युद्यतेऽन्तर्दधते स्वयं स्म १५ एवं संचिंत्य भगवान्स्वराज्ये स्थाप्य धर्मजं नंदयामास सुहृदः साधूनां वर्त्म दर्शयन् १६ उत्तरायां धृतः पूरोर्वंशः साध्वभिमन्युना स वै द्रौण्यस्त्रसंप्लुष्टः पुनर्भगवता धृतः १७ अयाजयद्धर्मसुतमश्वमेधैस्त्रिभिर्विभुः सोऽपि क्ष्मामनुजै रक्षन्रेमे कृष्णमनुव्रतः १८ भगवानपि विश्वात्मा लोकवेदपथानुगः कामान्सिषेवे द्वार्वत्यामसक्तः सांख्यमास्थितः १९ स्निग्धस्मितावलोकेन वाचा पीयूषकल्पया चरित्रेणानवद्येन श्रीनिकेतेन चात्मना २० इमं लोकममुं चैव रमयन्सुतरां यदून् रेमे क्षणदया दत्तक्षणस्त्रीक्षणसौहृदः २१ तस्यैवं रममाणस्य संवत्सरगणान्बहून् गृहमेधेषु योगेषु विरागः समजायत २२ ॥

षविवेकम् १९ स्निग्धो यः स्मितसहितोऽवलोकः तेन पीयूषकल्पया सुधातुल्यया पांगोलेसुधाप्रवाहरू पयात्मना देहेन २० क्षणदया रात्र्या दत्ताः अवसरः दत्त उत्सवो वा यासां स्त्रीणां तासु क्षणेषु सौहृदं यस्य सः २१ ॥ गृहमेधेषु गृहस्थधर्मेषु योगेषु कामयोगोपायेषु विरागः उदासीनं जातमित्यर्थः २२ २ ॥
॥ ॥ ॥ ॥ ॥

वारुणीपवमैरेयं तस्य दोषेण निम्लोचति अस्तं गच्छति सति मर्दनं कदनं २ उपस्पृश्य सरस्वत्यामाचम्य ३ अ
हं चोक्तः सर्वमेव द्वारकायां ४ तदभिप्रेतं कुलसंहारादिकं ५ कृतकेतं कृतावासं अकेतनं अनाश्रयं ६ वि
रजे विरजसं विदितं लक्षितं कौशं कौशेयं कौशाम्बरेण पीताम्बरेण ७ अधिश्रित्य उपरि स्थापयित्वा अपाश्रि

तेषां मैरेयदोषेण विषमीकृतचेतसां निम्लोचति रवावासीद्वेणूनामिव मर्दनं २ भगवान्स्वात्ममा
यायागतिं तामवलोक्य सः सरस्वतीमुपस्पृश्य वृक्षमूलमुपाविशत् ३ अहं चोक्तो भगवता प्र
पन्नार्तिहरेण ह बदरीं त्वं प्रयाहीति स्वकुलं संजिहीर्षुणा ४ अथापि तदभिप्रेतं जानन्नहमरिंदम
पृष्ठतोऽन्वगमं भर्तुः पादविश्लेषणाक्षमः ५ अद्राक्षमेकमासीनं विचिन्वन्दयितं पतिं श्रीनिकेतं सर
स्वत्यां कृतकेतमकेतनं ६ श्यामावदातं विरजं प्रशान्तारुणलोचनं दोर्भिश्चतुर्भिर्विदितं पीतकौ
शाम्बरेण च ७ वाम ऊरावधिश्रित्य दक्षिणाङ्घ्रिसरोरुहं अपाश्रितार्भकाश्वत्थमकृशं त्यक्तपिप्प
लं ८ तस्मिन्महाभागवतो द्वैपायनसुहृत्सखः लोकाननुचरन्सिद्ध आससाद यदृच्छया ९ त
स्यानुरक्तस्य मुनेर्मुकुंदः प्रमोदभावानतकंधरस्य आशृण्वतो मामनुरागहास समीक्षया विश्र
मयन्नुवाच १० २

तः पृष्ठतो दत्तः अर्भको बालः कोमलो अश्वत्थो येन तं त्यक्तं पिप्पलं विषयसुखं येन तथा अकृशमम्लानं
दर्शनं ८ द्वैपायनः सुहृत्सखा च यस्य सः स्वगुरुपुत्रत्वात् पराशरशिष्यो मैत्रेयः ९ अर्थः प्रमोदेन भा
वेन नमनं तत्कंधरा यस्य तथा तस्य आशृण्वतोऽनुरागो हासो यस्यां तया समीक्षया विश्रमयन् विगतश्रमं कुर्वन् १०

यदा स्वाधीनेष्वपि भावेषु नोविरागः तदा दैवाधीनेषु को विस्रंभेत विश्वासं प्रीतिं वा कः कुर्यात योगेन च योगेश्वरं
श्रीकृष्णमनुव्रतः २२ शेपुः शापं ददुः भगवतो मतेभिप्राये कोविदाः अभिज्ञाः २४ २५ वयःशीलादिव
ड्गुणोपेताः २६ कन्याश्च वृत्तिकरीं जीविकापर्याप्तां २७ भगवदर्पणं यथा भवति गोविप्रार्था असवो येषां

दैवाधीनेषु कामेषु दैवाधीनः स्वयं पुमान् को विस्रंभेन योगेन योगेश्वरमनुव्रतः २२ पुर्यां कदा
चित्क्रीडद्भिर्यदुभोजकुमारकैः कोपिता मुनयः शेपुर्भगवन्मतकोविदाः २४ ततः कतिपयैर्मा
सैर्वृष्णिभोजांधकादयः ययुः प्रभासं संहृष्टा रथैर्देवविमोहिताः २५ तत्र स्नात्वा पितॄन्देवानृषींश्चै
व तदंभसा तर्पयित्वाथ विप्रेभ्यो गावो बहुगुणा ददुः २६ हिरण्यं रजतं शय्यां वासांस्यजिनकंब
लान् यानं रथानिभान्कन्या धरां वृत्तिकरीमपि २७ अन्नं चोरुरसं तेभ्यो दत्वा भगवदर्पणं गोवि
प्रार्थासवः शूराः प्रणेमुर्भुवि मूर्धभिः २८ इति श्रीभागवते तृतीयस्कंधे तृतीयोऽध्यायः ३ उद्ध
व उवाच अथ ते तदनुज्ञाता भुक्त्वा पीत्वा च वारुणीम् तया विभ्रंशितज्ञाना दुरुक्तैर्मर्म पस्पृशुः १

इति श्रीभावार्थदीपिकायां तृतीयस्कंधे तृतीयोऽध्यायः ३ चतुर्थे वृष्णिनिधनं श्रुत्वात्मज्ञानलब्धये उ
द्धवस्योपदेशेन तन्मैत्रेयमागमत् ते ब्रह्मण्योरनुज्ञाताः वारुणीयेष्टोमदिरां १ ॥ ॥ ॐ रामाय
नमो नमः ॥ ॐ कृष्णाय बलभद्राय नमः ॥

श्री॰ भाग॰ टी॰ ११

सर्वतः सर्वगुणैः स्वतत्त्वानि प्रकृतेर्मायया विविधं भवंते विस्तारं तदिच्छायायद्वा प्रकृतेर्हेतोः विविधं भवति न मिथ्या ५
कालः कालयवनः रुंधतः प्राप्ताएव ततः सुखुंद भीमादिभिः स्वयमेवाजीवनं तत्प्रातितवान् तेषां स्वपुंसानेन प्रभावे
कीर्तिवादनवान् ९ शौंकवांद्विविधं वल्कलान्यपि कांश्चित्प्रयत्नरामादिभिः प्रातयत् प्रयातंपत् प्रातयत्नि।
तिवापावः देतवक्रादीन् स्वयमेवयात स्वपातप्रातयदिमत्ठ्यंगः १२ कथंभूतान् ऊरुदेन्तमापततावाच्छता

आदित्याद॰ ई॰

तामुपयायाज्जनयदात्मतत्त्वानि सर्वतः एकैकस्यां दशदशप्रकृतेर्विंशद्भूपया ५ कालमागतमा
त्वादीन् नीकैः रुंधतः पुरम् अजीवनत्स्वयं द्विमस्वपुंसातेजआविशात् १० शौंकवंद्विविधं वाणं
दं वल्कलमेवच अपांस्कुदंतवक्रादीनवधीत्कांश्चप्रातयत् ११ अथतेप्रान्तप्रजाणां पदयोः पा
तितानत्स्पान् चचालभूः कुरुक्षेत्रे येषामापततां बलैः १२ सकर्णडुःशासनसौबलानांकु
मंत्रपाकेनहतश्रियायुषं सुयोधनं सानुचरंशयानं भग्नोरुमुर्व्यां ननंदपश्यन् १३ कियान्
नभुवोयं त्वपितोरुभारो यद्द्रोणभीष्मार्जुनभीममूलैः अष्टादशाक्षौहिणिकोमदंशैरास्तेबलंदु

विषहंयदूनाम् १४ २

येषां बलैः सैन्यैर्भूः सर्वा पिचचाल १२ सकर्णः हताश्रीरायुश्चयस्य भग्नावूरूयस्य।
तंदुर्व्यांशयानं पश्यन्नपि न ननंद तोषं न प्राप १३ अननभिनंदनप्रकारमेवाह कियानिति द्रोणादिभिर्मूलैः।
कारणभूतैः यदिति यः अष्टादशाक्षौहिणीयुक्तः इत्त्वत्वमार्पतपितउरुभारोयंकियान् अत्र लेशत
र्थः यस्मान्मदंशैः प्रद्युम्नादिभिः हेतुभूतैर्दुर्विषहं बलमास्ते १४ २ ११

ककुद्मतोऽथ प्रभाव् अविद्वान् सिकान् हत्वेति वातैर्हर्षेस्तद्वन्नव भग्नोमानो येषां तथा पितान् पृथ्वतः काम यमानान् अत एवाज्ञान् ग्रासभृतो रात्तः तद्धे सैः प्रत्नत एव जयान् ४ यदा आदिमाः कुण्डलेनां टंक द्वेद ते स्वर्गगतः तदा प्रभुः स्वेतेजोग्रास्यः स्त्रीपरं तं च इव प्रियायाः समभामायाः प्रिये विधातुमिछुः फलरूपा विज्ञानमानीतवान् यदर्थं यन्निमित्तं कुलं वज्री स्त्रीप्रविनोयाप्तुमनुधावत स्वकार्यसाधकं तते नयुद्धे

ककुद्मतो विद्रुतमोदमित्वास्वयं च वैरेनाग्र जितीसुवाह तद्गुमानान् यिगृध्यनोज्ञानजवैर्दिततः श्रा सभृतः स्वग्रासैः ४ प्रियं प्रभुर्ग्राम इव प्रियायाविधित्सराज्ञे युतकं यदर्थे वज्रैर्यथावलवाणा रूपाथः क्रीडारुतगो नूतमयैव पूनो ५ सतं मरुपे वैवप्रभावसंतेः द्रष्टा स्वनाभोन्मथितेथवि आ आमवित स्त्रनूतयायधेगे दुत्वातदंतः पुरमाविवेश ६ तत्राकृतास्नानरदेवकन्याः कुन्तेन द्रष्टा हरिमार्तवे च उत्थाय सद्याजगृहुः प्रहर्ष क्रीडानुरागप्रहितावलोकैः ७ आसां मुहूर्ते एकस्मिन्नानागौरवप्रयोधितो सविधं जगृहे पाणीन्तत्रूपः स्वमायया ८ २ ॥

यासमस्तस्याप्युक्तं च वज्रस्याह क्रीडारसगाइवेति यन्निमित्तं कुलं वज्री स्त्रीप्रविनो ५ स नाभेन यु कोणाउन्म थितेस्तं तेभो सं दृष्टातस्यमानाधवि आभृत्पा आमंत्रितः प्रार्थितः सन् तस्यनन यायभगाद् त्रायद्दन्तः प्रेषेराजेद तो ६ तत्रांतः पुरे कुन्तेन सोमेनयात्राकृतास्नाः प्रहर्षसु क्रीडायानुरागाद्युतैः प्रहिताः प्रेषिता ये सुन्दर लोकाः तैर्जगृहुः स्वीकृतवत्यः ७ आसां योषितां पाणीं स्तत्त्रदनुरूपः सन् सविधं विवाहोचितप्रकारसहितं यथा

वज्राद्द्वारं

१४

मुक्ति

श्री·
भाग·
टी·
१०

तेदक्षिणायन शामितमस्यर्थं पित्रोः सुखस्य चिकीर्षयेत्यर्थः तं गादाज्जर्मचात रिपुपुत्रनाशकं सेव्यसो रपित्रोः
सुखार्थं २ ब्रह्मवेदं सविस्तरं षडङ्गादि सहितं पञ्चजनोदरविदारणाद्वा पुत्रमानीयेत्यर्थः ३ भीष्मकक
न्यया रुक्मिण्या ये राजान आहूताः स्वयंवरमार्थं समाहूता इति पाठे आकूताइत्यर्थः केन साधनेन श्रियो
लक्ष्म्याः सवर्णानि समानेन रूपेणाय घपितया केवले श्रीकृष्ण आहूतः न सर्वे तया पितस्यालावर्णपतेषामा

सांदीपनेः सकृत्प्रोक्तं ब्रह्माधीत्य सविस्तरम् तस्मै प्रादाद्वरं पुत्रं मृ
तं पंचजनोदरात् २ समाहूता भीष्मककन्यया ये श्रियः
सवर्णेन बुभूषयैषां गांधर्ववृत्त्या मिषतां स्व
भागं जह्रे पदं मूर्ध्नि दधत्सुपर्णः

गामनेहैन रितित्येवाहूताइत्युच्यते एषां मिषतां मूर्ध्नि पदं दधत् तया सह गांधर्ववृत्त्या परस्परसमय
रूपया बुभूषया भवितुमिच्छया जहार कथंभूतां स्वभागं लक्ष्मीत्वात्तया तस्मै नोर्पितत्वात् सुपर्णः सुप
र्णः यथा सुपर्णाद्वि स्वभागं सुधामित्यर्थः यद्वा श्रिया रुक्मिण्या समानेन वर्णेन वाचकेन यस्य सः
श्रियः सवर्णः कृष्णस्तेन समाहूताः शिशुपालादयः किमर्थं भीष्मककन्यायास्ते वां बुभूषया भूतिं भवि
तुमित्यर्थः तत्र शिशुपालस्याह्वानं च वचनं बुभूषया जरासंधादीनां तु हि वाह्यत्वे शेषो द्रष्टव्यः ३

१० राम

तृतीयं १

सएवाधिकंवयःप्राप्तःसन्लक्ष्म्याःशोभादिसंपदोनिकेतनंसिताःगोवृषायस्मिंस्तान्गोगणान्चारयन्
वेणुघोषस्यशरीरमतरमयामास व्यनुदत् जघान । क्रीडनकांस्तृणादिनिर्मितान् सिंहादीन्यथा बालः स्व: २
न्योगाणन्नगावइति । गावस्तोयमापाययत देवतोयं प्रकृतिस्थितं निर्विषं ॥ ३१ ॥ इंद्रयज्ञभंगेन कृतागवाहवगोः

सएवगोधनंलक्ष्म्यानिकेतंसितगोवृषं । चारयन्ननुगान्गोपान्रणद्वेणुररीरमत् ॥ २९ ॥ प्रयु
क्तान्भोजराजेनमायिनःकामरूपिणः ॥ लीलयाव्यनुदत्तांस्तान्बालःक्रीडनकानिव ॥ ३० ॥ विपन्ना
न्विषपानेननिगृह्यभुजगाधिपं ॥ उत्थाप्यापाययद्गावस्तत्तोयंप्रकृतिस्थितं ॥ ३१ ॥ अयाजयद्गोसवे
नगोपराजंद्विजोत्तमैः ॥ वित्तस्यचोरुभारस्यचिकीर्षन्सद्व्ययंविभुः ॥ ३२ ॥ वर्षतीन्द्रेव्रजःकोपा
द्भग्नमानेतिविह्वलः ॥ गोत्रलीलातपत्रेणत्रातोभद्रानुगृह्णता ॥ ३३ ॥ शरच्छशिकरैर्मृष्टंमानयन्
रजनीमुखं ॥ गायन्कलपदंरेमेस्त्रीणांमंडलमंडनः ॥ ३४ ॥ इतिश्रीभागवतेतृतीयस्कंधेद्वि
तीयोध्यायः ॥ २ ॥ उद्धवउवाच ॥ ततःसआगत्यपुरंस्वपित्रोश्चिकीर्षयाशंबलदेवसंयुतः ॥ निपात्य
तुंगाद्रिपुवृन्दनाथं ॥ हतंव्यकर्षद्व्यसुमोजसोर्व्यां ॥ १ ॥ २ ॥

तेनमो १ ःपराजेनंदंद्विजसंचेतिचकारादिंद्रस्यमानभंगंकुर्वन् । उरुभारस्यातिसमृद्धस्य ॥ ३२ ॥ कोपाद्वर्षतिगोत्रः
पर्वतएवलीलातपत्रंतेनहेभद्र ॥ ३३ ॥ स्त्रीणांमंडलंमंडयतीतितथा ॥ ३४ ॥ इतिश्रीभावार्थदीपिकायां
तृतीयस्कंधेद्वितीयोध्यायः ॥ २ ॥ तृतीयेमथुरासेतुव्रजान्तंसवधादिकं । यत्कृतंद्वारकायांचकृष्णेन

स्त्रीमंर

प्रसिद्धं

ननु भागवतानेव भगवाननुगृह्णातीति प्रसिद्धं तत्कथमभागवतानेव मन्ये यतो भागवता इव तेऽपि भगवंतं ध्या
नाभिनिवेशेन भगवंतमपरोक्षं पश्यंतीत्याह संरंभः क्रोधावेशः तेन मार्गेणाभिनिविष्टं चित्तं येषां तान् अत एव सं
ग्रामे तार्क्ष्यः कश्यपः तस्य पुत्रो गरुडस्तस्यांसे स्कंधे सुनाभायुधः चक्रायुधो हरिर्यस्य तमापतंतं पश्यंतः तस्मात्तेष्वप्य
नुग्रहो युक्त एवेत्यर्थः वक्ष्यति च तस्मात्केनाप्युपायेन मनः कृष्णे निवेशयेदिति ॥२४॥ इदानीं तस्यानर्थनिग्रहका

मन्ये सुरान्भागवतांस्त्र्यधीशे ॥ संरंभमार्गाभिनिविष्टचित्तान् ॥ ये संयुगेऽचक्षत तार्क्ष्य
पुत्रमंसे सुनाभायुधमापतंतं ॥२४॥ वसुदेवस्य देवक्यां जातो भोजेंद्रबंधने ॥ चिकी
र्षुर्भगवानस्याः शमजेनाभियाचितः ॥२५॥ ततो नंदव्रजमितः पित्रा कंसाद्विबिभ्यता
एकादश समास्तत्र गूढार्चिः सबलोऽवसत् ॥२६॥ परीतो वत्सपैर्वत्सांश्चारयन्व्याहरद्वि
भुः ॥ यमुनोपवने कूजद्द्विजसंकुलितांघ्रिपे ॥२७॥ कौमारीं दर्शयंश्चेष्टां प्रेक्षणी
यां व्रजौकसां ॥ रुदन्निव हसन्मुग्धबालसिंहावलोकनः ॥२८॥ ॥ ॐ रामाय नमः ॥ कौमारीं

कारं बकमादित आरभ्य ॥ तच्चरितं संक्षेपयतः कथयति ॥ वसुदेवस्य भार्यायां जातः भोजेंद्रः कंसः तस्य
बंधनागारे अस्याः पृथिव्याः शं सुखं स्वयं चिकीर्षुः ॥ अजेन ब्रह्मणा याचितः सन् ॥ पित्रा हेतुभूतेन नंदव्रजमितः
गतः समाः संवत्सरानवसत् गूढार्चिः गुप्ततेजाः ॥२६॥ व्याहरत् क्रीडत् कूजद्भिः द्विजैः पक्षिभिः संकुलिता व्याप्ता
अंघ्रिपा यस्मिन् ॥२७॥ रुदन्निवेति इवशब्दस्य यथायोगं सर्वत्राप्यन्वयः मुग्धो बालश्चासौ सिंहश्च तद्वदवलोक

तदेवं परमेश्वर्येऽपि यदुग्रसेनानुवर्तित्वं तत्पुनरस्मान् संतापयतीत्याह स्वयं त्विति एवंभूतः तस्य तत्कैंकर्यं नोऽस्मा
न्विग्लापयतीति उत्तरेणान्वयः न साम्यातिशयौ यस्य असमः तेनान्यस्य साम्यमतिशयश्च नास्तीत्यर्थः त्रयहेत
वः त्रयाणां पुरुषाणामधीशः स्वाराज्यलक्ष्म्या परमानंदस्वरूपसंपत्त्यैव प्राप्तसमस्तभोगाः बलिं अर्हणां प्रणमतां
णां आहरद्भिः समर्पयद्भिः चिरकालीनैः लोकपालैः किरीटाग्रैः ताडितं स्तुतं पादपीठं यस्य प्रणतकिरीटस

स्वयं त्वसाम्यातिशयस्त्र्यधीशः स्वाराज्यलक्ष्म्याप्तसमस्तकामः बलिं हरद्भिश्चिरलोकपालैः किरी
टकोटीडितपादपीठः २१ तत्तस्य कैंकर्यमलं भृतान्नो विग्लापयत्यंग यदुग्रसेनं तिष्ठन्निषण्णं
परमेष्ठिधिष्ण्ये न्यबोधयद्देव निधारयेति २२ अहो बकी यं स्तनकालकूटं जिघांसयापाय
यदप्यसाध्वी लेभे गतिं धात्र्युचितां ततोऽन्यं कं वा दयालुं शरणं व्रजेम २३ ॥ २ रामश्री

न्यबोधयत्

युक्तनख्यति देवस्तति त्वेनोऽप्यस्य ते २१ भृत्यविदुरभृतान्नः स्मानदुग्रसेनेयत्किंकरत्वं तदेवाह परमेष्ठिधि
ष्ण्ये राजासने निषण्णमासीनं स्वयं तिष्ठन् हे देव प्रवधारयेति यद्विज्ञापितवान् २२ एवमनुवृत्तिः कृपयेवेति
सूचयन् पकारविद्विपितस्य कृपालुतां दर्शयन्नाह अहो आश्चर्यं हंत मिकृयापि स्तनयोः संभृतं कालकू
टं विषं यमपाययत् बकी पूतना असाध्वी दुष्टापि धात्र्याः यशोदाया उचितां गतिं लेभे सत्कवेषमात्रेणाय
तं उतिदत्तवान् ततोऽन्यं कं वा व्रजेम २३ २ शो
भजेम

स्वाल्लुताया२

श्री भा० त० टी० ८

ननु कृतोऽयं परावरगामी शोकः पारतंत्र्यप्रतीतेरित्याह मामिति एतत्तद्दुर्वितर्क्यं दुःखं च खेदयति तदेवाह वसुदेव गेहे जन्मतो यद्विडंबनं अनुकरणं न त्वेवं सिद्धं वसुदेवकस्मात् आविर्भावः कंसभयादिव निलीय व्रजे वासश्च कालयव नादिरिपुभयादिव पुरान्मथुरायाः व्यवात्सीत् पालयत १६ एतद्दुःखरूपं स्मरतो मम चेतः कथंभूतं दुनोति व्यथयति तदेव दर्शयति यदाहेति हे तात हे अंब च प्रसीदतं प्रसादं कुरुतं न कृता निष्कृतिः शुश्रूषणं येस्तेषां

मां खेदयत्येतदजस्य जन्म विडंबनं यद्वसुदेवगेहे व्रजे च वासोऽरिभयादिव स्वयं पुराद्व्यवात्सीद्यदनं
तवीर्यः १६ दुनोति चेतः स्मरतो ममैतद्यदाह पादावभिवंद्य पित्रोः तातांब कंसादुरुशंकितानां
प्रसीदतं नोऽकृतनिष्कृतीनां १७ को वा अमुष्यांघ्रिसरोजरेणुं विस्मर्तुमीशीत पुमान्विजिघ्रन्
यो विस्फुरद्भ्रूविटपेन भूमेर्भारं कृतांतेन तिरश्चकार १८ दृष्टा भवद्भिर्ननु राजसूये चैद्यस्य
कृष्णं द्विषतोऽपि सिद्धिः यां योगिनः संस्पृहयंति सम्यग्योगेन कस्तद्विरहं सहेत १९ तथैव चा
न्ये नरलोकवीरा य आहवे कृष्णमुखारविंदं नेत्रैः पिबंतो नयनाभिरामं पार्थास्त्रपूताः पदमापु
रस्य २०

नोऽस्माकं बहुवचनं आसाय अभिप्रायं १७ ननु तर्हि अयं नीपप्रपएक एव किं न स्यात् न वत अद्भुतमात्रमेतत्तत्रा ह को वेति भिः को वा अमुष्यांघ्रिसरोजरेणुं न मेघ विजिघ्रन् आघ्राणः विस्मर्तुमीशीत शक्नुयात् विस्फुरन् भ्रूवि टपः भ्रूलता स एव कृतांतः तेन १८ न च तस्य विरहं सहनीयं भवद्भिरपि दृष्टत्वात् इत्याह दृष्टेति यां सि द्धिं सम्यग्योगेन प्राप्तुं वांछंति १९ आहवे युद्धे पार्थस्यास्त्रैः पूतानि पापाः संतः २० २ ॥ ॥ ८

तदेव विशिनष्टि त्रिभिः यन्मर्त्यलीलासु उपयिकं योग्यं स्वस्यापि विस्मयजनकं यतः सौभगर्द्धेः सौभाग्याति
शयस्य परं पदं पराकाष्ठा भूषणानां भूषणान्यङ्गानि यस्मिन्। १२। दृक्स्वस्त्ययनं नेत्रानन्दकरं त्रिभुवनस्थो लोकः आ
त्मा सात्र मद्येदानीं इह रूपविशेषे अर्वाक्सृतौ अर्वाचीनसंसारनिर्माणे सगुणनिर्माणे वा यत्कौशलं तेन पुंसा तत्का
र्त्स्न्येन सामस्त्येन गतं नातः परं तस्य कौशलमस्तीत्येवमेनं तन्मूर्तिं विधातुः स्वजनताभावे लोकस्य दृक्स्थितिरिय
मुक्ता। १३। अनुरागेण प्लुतः व्याप्तः हासः रासो विनोदः लीलावलोकश्च तैः स्वकृतहासाद्यनन्तरं प्रतिल

यन्मर्त्यलीलौपयिकं स्वयोगमायाबलं दर्शयता गृहीतं। विस्मापनं स्वस्य च सौभगर्द्धेः परं पदं भूषणभू
षणांगं। १२। यद्धर्मसूनोर्बत राजसूये निरीक्ष्य दृक्स्वस्त्ययनं त्रिलोकः। कार्त्स्न्येन चाद्येह गतं विधातु
रर्वाक्सृतौ कौशलमित्यमन्यत। १३। यस्यानुरागप्लुतहासरासलीलावलोकप्रतिलब्धमानाः।
व्रजस्त्रियो दृग्भिरनुप्रवृत्तधियोऽवतस्थुः किल कृत्यशेषाः। १४। स्वशान्तरूपेष्वितरैः स्वरूपैरभ्य
र्द्यमानेष्वनुकम्पितात्मा। परावरेशो महदंशयुक्तो ह्यजोऽपि जातो भगवान्यथाग्निः। १५। २

ब्धो मानो याभिस्ताः दृग्भिः सह अनुप्रवृत्ता धियो यासां ताः कृत्यशेषा येषां ताः असमापित
कृत्या अवतस्थुः। १४। एवंभूतं विपद्धनि कारमाह स्वीयास्वेव शान्तास्वशान्तासु च रूपासु तत्राशान्तरू
पेषु इतरैः पीड्यमानेष्वनुकम्पितः कृतानुकम्पः स्वात्मा यस्य सोऽजोऽपि जातः आविर्भूतः महाभूतद्वयेन नि
सिद्ध इवाग्निर्यथा काष्ठे अभिव्यक्तिस्तद्वत्। अजन्मनि हेतुः महदंशमहत्तत्त्वमंशाः कार्यलिङ्गा यस्य तेन महदं
शेन युक्त इति। १५। २। राम

यथा मीनास्तिमिं ... हरिं मत्स्यरूपिणं उडुपं संसारतारकं न विदुः तथेति ... यद्वा समुद्रमथनात् पूर्वं मीना सह संवसंतो उडुपं चंद्रं
न विदुः तथा कथं ... ८

श्री· भाग· टी· ७

श्रीकृष्णविरहेण संतप्यमानः आह श्रीकृष्ण एव द्युमणिः सूर्यः तस्य निम्लोचे अस्तमये सति अजगरेण कालस
र्पेण गीर्णेषु निगलितेषु नो गृहेषु गतश्रीषु नष्टशोभेषु नो किं कुशलं ब्रूयां ७ अनुशोचन्नाह दुर्भगो भाग्यहीनः ये सह
संवसंतोपि हरिं न विदुः यथा क्षीरसमुद्रे ... उडुपं चंद्रं मीनाः केवलं कमनीयः कश्चिज्जलचरः इत्ये
व विदुः न तु परमेश्वर इति तद्वत् यद्वा जले प्रतिबिंबितं चंद्रमेव इति ८ भाग्यहीनत्वादेव न विदुः न तु ज्ञानसा
मग्र्यभावादित्याह इंगितं चित्तं ये जानंतीति तथा प्रौढाः अतिशयेन प्रौढाः निपुणाः एकस्मिन्नेव स्थाने आरमं

उद्धव उवाच । कृष्णद्युमणिनिम्लोचे गीर्णेष्वजगरेण ह । किं नु नः कुशलं ब्रूयां गतश्रीषु गृहेष्वहं । ७
दुर्भगो बत लोकोयं यदवो नितरामपि । ये संवसंतो न विदुर्हरिं मीना इवोडुपं । ८ इंगितज्ञाः पुरु
प्रौढा एकारामाश्च सात्वताः । सात्वतामृषभं सर्वे भूतावासममंसत । ९ देवस्य मायया स्पृष्टा ये
चान्यदसदाश्रिताः । भ्राम्यते धीर्न तद्वाक्यैरात्मन्युप्तात्मनो हरौ । १० प्रदर्श्यातप्ततपसामवितृप्त
दृशां नृणां । आदायांतरधाद्यस्तु स्वबिंबं लोकलोचनं । ११ ॥

तीति तथा एवंभूता अपि भूतानामावासमीश्वरं संतं॥
सात्वतां ऋषभं सात्वतश्रेष्ठमेव अमन्यंत ९ येषां द्वा देवमायया मोहिताः यादवोयमस्माकं पुत्र इति वदंति ये च अन्ये अप
लापिनः असदेवान्यदेव माश्रिताः निंदंति तेषां वाक्यैः आत्मनि हरौ च उप्तात्मनां निहितमनसां मादृशानां धीर्न भ्राम्य
ते मोहं न प्राप्नोति अन्यत् तु स्पष्टं एवं न युक्तः १० कोसौ हरिरिति तमेव लालयन्नाह प्रदर्श्येति न तप्तं तपो यैः अतो अवितृप्ता
दृशो येषां स्वबिंबं मूर्तिं एतावंतं कालं दर्शयित्वा योन्तर्हितवान् लोकस्य लोचनमाह्लादकत्वाल्लोकलोचनस्य।

तै

श्रीभागवतटीका ७

विरहोत्कंठ्याकेलीना२

इतिश्रीभावार्थदीपिकायांतृतीयस्कंधेप्रथमोध्यायः १ द्वितीयेकृष्णविश्लेषादुत्थशोचत्तयोद्धवः तत्रैवाल पवित्रात्रिकृतस्यावतीयतकथितं तदेवंप्रियवार्ताप्रहृष्टस्योद्धवस्यश्रीकृष्णकंठविरहोत्कंठ्यानप्रतिवचना सामर्थ्यमाह षड्भिःइतीति स्मारितईश्वरोयस्य १ एतदेवकैमुत्यन्यायेनप्रपंचयतिद्वाभ्यां यःपंचव र्षोपिबाललीलयाकृष्णंकल्पितविकल्पितैरेवसाधनैःपरिचर्ययार्चितवान् आनभोजनार्थप्रार्थितोपितद्रोजनं

इतिश्रीभागवतेतृतीयस्कंधेप्रथमोध्यायः १ श्रीशुकउवाच इतिभागवतःपृष्टःक्षत्त्रावार्तांप्रि याश्रयां प्रतिवक्तुंनचोत्सेहेऔत्कंठ्यात्स्मारितेश्वरः १ यःपंचहायनोमात्राप्रातराशायया चितः तन्नैच्छद्रचयन्यस्यसपर्यांबाललीलया २ सकथंसेवयातस्यकालेनजरसंगतः पृष्टोवार्तांप्रतिब्रूयाद्भर्तुःपादावनुस्मरन् ३ समुहूर्तमभूत्तूष्णींकृष्णांघ्रिसुधयाभृशं तीव्रे
ग्रः णभक्तियोगेननिमग्नःसाधुनिर्वृतः ४ पुलकोद्भिन्नसर्वांगोमुंचन्मीलद्दृशाशुचः पूर्णार्थो लक्षितस्तेनस्नेहप्रसरसंप्लुतः ५ शनकैर्भगवल्लोकान्नृलोकंपुनरागतः विमृज्यनेत्रेविदुरं प्रत्याहोद्धवउत्स्मयन् ६ ॥ तस्यामेवतीर्थे

नैच्छत् २ जरसंवृद्धत्वंगतःप्राप्तः ३ श्रीकृष्णांघ्रिसुधयासाधुनिर्वृतः विवशात्वात्पादकेनभक्तियोगे नभृशंनिमग्नश्च ४ पुलकैरुद्भिन्नानिउद्गतानिलोमानियस्य मीलन्त्याद्दृशाःशुचःअश्रूणिमुंचन् तेनविदुरेणपूर्णार्थःकृतार्थोलक्षितःयतोभगवतियःस्नेहप्रसरःस्नेहप्रवाहःतस्मिन्संप्लुतोनिमग्नः ५ भग वानेवलोकःतस्मात्नृलोकंदेहानुसंधानंउत्स्मयन् यदुकुलसंहारादिभगवच्चरित्रंस्मरणेनविस्मयंप्रा

भा० ३ ९

ननु हरेः किमेवं लीलया येन स्वभक्तानां वनवासादिक्लेशा भवंति स्वस्य च दोषमेवं धनोद्यमादिप्रभवः तदुक्तं तेषा
मपराधान्तत्क्षमेव हृत्वा नेनापराधोपेक्षा इत्याह नूनमिति त्रिभिर्मदैरुत्पथानामुत्पथगानां वधाद्धेतोः प्रपन्ना
नार्तिजिहीर्षया ईशः आशु समर्थ एव वृहत्त्समर्थोपि कुरूणामघमुपेक्षत तदानीमेव तेषां वधे सर्वदुःखाभा
वो न स्यादित्यभिप्रायेण त्रयः विद्यामदो धनमदस्तथैवाभिजनोमदः एते मदा मदांधानां त एव हि सतां दा।

नूनं नृपाणां त्रिमदोत्पथानां महीं मुहुः चालयतां चमूभिः वधात्प्रपन्नार्तिजिहीर्ष
येशोप्युपैक्षताघं भगवान्कुरूणां ४३ अजस्य जन्मोत्पथनाशनाय कर्माण्यक
र्तुर्ग्रहणाय पुंसां नन्वन्यथा कोर्हति देहयोगं परो गुणानामुत कर्मतंत्रं ४४
तस्य प्रपन्नाखिललोकपानामवस्थितानामनुशासने स्वे अर्थाय जातस्य य
दुष्वजस्य वार्तां सखे कीर्तय तीर्थकीर्तेः ४५ राम

माः ४४ सर्वदुःखनिवृत्त्यर्थमेव भगवतो जन्मकर्माणीति नान्यथेति कैमुतिकन्यायेनाह अजस्यापि जन्म
अकर्तुः कर्माण्यपि पुंसां ग्रहणाय कर्मसु प्रवृत्तये अन्यथा न चेदेवं तर्हि भगवतो जन्मादिकं नावदा।
स्तां कोवान्योपि गुणानां परो गुणातीतो देहयोगं कर्मविस्तारं चार्हतीति तस्मादेवंभूतावतारमायाविहारस्य
कथां कथयेत्याह तस्येति प्रपन्ना ये अखिललोकपालास्तेषामनुशासने स्वे अवस्थितानामर्थाय प्रयोजना

दृष्ट्यायाः किंनु कृपाले दृष्टेऽयं यतस्तस्याः पादुनाविनाप्राणानां धारणमेवाश्चर्यमित्याह अहो इति म्रि
यते जीवति नवा अस्माश्चर्यं यतो भर्कार्थे म्रियते न भोगार्थं न तथा पितामाश्चर्यमेवेत्याह तेन न यापुत्रेण विना
न देवाह्न यन्ति तिभुवे वद्वितीयं सहायो यस्य दृष्ट्यार्भकार्थे जीवनमत्र शोचामि न त्विमथः पतंतं न मेहेतुः
परेता यस्तातय ग्राम पांडवे तस्तु वनेऽपि निर्याप्य विदुरु हे दोऽहं कृतवान् किंच जीवतो पितु भ्रातुर्मे मापकृत

अहो दृष्ट्यापि म्रियतेर्भकार्थे राजर्षिवर्येण विना पितेन यस्त्वेकवीरोऽथ विथ्यो वि
जित्य यचुर्द्वितीयः ककुभः चतस्रः ५० सोऽस्यानुशोचे तमथः पतंतं भ्रात्रे परे
ताय विदुद्रुहे यः निर्यापितो येन सुहृत्स्वपुर्या अहं स्वपुत्रान् समनुव्रतेन ५१
हं सोऽहं हरेर्मर्त्यविडंबनेन दृशो नृणां चालयतो विधातुः नान्योपलक्ष्यः पदवी
प्रसादाच्चरामि पश्यन्गतविस्मयोऽत्र ५२ ॥ ॐ तस्मै रामचंद्राय नमः ॥

द्यानित्याह येन सुहृज्ज्ञाता अहं स्वपुर्याः सकाशात् निर्यापितः विवासितः ५१ अहो खलु विस्मयो
मेऽनंतो पितस्य वेदुश्चेष्टितं यतः त्वं साधुरपि तुः स्वप्नापितो सीमतमाह सोऽहं हरेः प्रसादात् तस्य पद
वीं माहात्म्यं पश्यन्नुगतविस्मयः अत्र भूतले मान्योपलक्ष्यः स्वरवं विचरामि कथं भूतस्य मर्त्यविडंबनेन
ऐश्वर्याच्छादनेन मैत्र्यानुकरणेन नृणां दृशः चित्तवृत्तीः चालयतः भ्रामयतः ५२ ॥ २ राम

इदानीं अन्तःपुरस्थं पृच्छति षड्भिः अपि किं स्वदोर्भ्यां स्वबाहुवत् वर्तमानाभ्यां विजयाच्युताभ्यां अर्जुनकृष्णाभ्यां धर्मे
णाधर्मो युधिष्ठिरः सेतुं धर्ममर्यादां परिपाति यस्य सभायां विजयानुवृत्त्या जयपरंपरयार्जुनस्य सेवये
ति वा एवं यस्य संपदं दृष्ट्वा इत्यर्थः ३६ कृतागेषु कृतापकारेषु कुरुषु स्वकर्तृकं मन्युं दीर्घतमं बहुकालं चिंतितं
अहिवत् यः अमर्षी भीमः किं व्यमुंचत् गदायाः विचित्रं विविधं मार्गं चरतः ३७ रथयूथपानां मध्ये यशोधाः

अपि स्वदोर्भ्यां विजयाच्युताभ्यां धर्मेण धर्मः परिपाति सेतुं दुर्योधनोऽतप्यत यत्सभायां साम्राज्यल
क्ष्म्या विजयानुवृत्त्या ३६ किं वा कृताघेष्वघमत्यमर्षी भीमोऽहिवद्दीर्घतमं व्यमुंचत् यस्यांघ्रिपा
तं रणभूर्न सेहे मार्गं गदायाश्चरतो विचित्रं ३७ कच्चिद्यशोधा रथयूथपानां गांडीवधन्वोपरतारि
रास्ते अलक्षितो यच्छरकूटगूढो मायाकिरातो गिरिशस्तुतोष ३८ यमावुतस्वित्तनयौ पृथायाः
पार्थैर्वृतौ पक्ष्मभिरक्षिणीव रेमात उद्दाय मृधे स्वरिक्थं परात्सुपर्णाविव वज्रिवक्त्रात् ३९

कीर्तिं धारयति यशोधाः स्वीयानां तेषां कीर्तिप्रदः उपरताः अरयो यस्मात् यस्य शरकूटेन बाणसमूहेन गूढः आच्छन्नः ३८
उत स्वित् किं स्वित् तनयौ नकुलसहदेवौ रेमाते क्रीडतः इत्यर्थः पार्थाः स्वतातपि पृथायाः पुत्रैः वृतौ सुपर्णाविव
वज्रिणः इंद्रस्य मुखात् अमृतं यथा गरुडः यथा परात् शत्रोः दुर्योधनात् स्वरिक्थं स्वकीयं धनं उद्दाय गृहीत्वा यस्यां सति
अमृतं गरुडः इवेति यद्वा सुपर्णाविवेति पदद्वयं गरुडः अमृतमानयेनान्तर्हितद्वय इति गीतिवेतिमाणीवा
दिगणानामपि ३९ ॥ श्री

५

रुं देवकनामायोभोजः तस्यपुत्र्यादेवक्याः विलक्षःप्रज्ञापुत्रोयस्याः तस्यादेवमातुर्वदितेस्विककच्चिच्छिवं यज्ञविता
नमर्थंत्रयीयथाप्रकाशतयाबिभर्तितथादधार ३३ सात्वतानामुपासकानांकामान्दोग्धिपूरयतीतिकामदु
घः भगवत्वेहेतुः यंशास्त्रस्यशास्त्रस्ययोनिंकारणमामनंतिदेवाः कृतः मनोमयं मनसः प्रवृत्तेकेतत्कृतेः सत्वस्य
अंतःकरणस्यचतुर्विधस्यतुरीयंतत्त्वंचतत्पुमथिदेवविनाहंकारबुद्धिमनसांअंतःकरणभेदानांक्रमेणवासु
देवसंकर्षणप्रद्युम्नानिरुद्धाअधिष्ठातारः मनसस्तुप्रशास्त्रयोनित्वप्रसिद्धं मनःसर्वहृपेवागतंरहपेवेतितथाश्च

कच्चिच्छिवंदेवकभोजपुत्र्याविलक्षप्रज्ञायाइवदेवमातुः यावैस्वगर्भेणदधारदेवंत्रयीयथायज्ञवितान
मर्थं ३३ अपिस्विदास्तेभगवान्सुखंवो यःसात्वतांकामदुघोनिरुद्धः यमामनंतिस्महशास्त्रयोनिं
मनोमयंसत्त्वतुरीयतत्त्वं ३४ अपिस्विदन्येचनिजात्मदैव मनन्यवृत्त्यासमनुव्रताये हृदीकसत्यात्म
जचारुदेष्णगदादयःस्वस्तिचरंतिसौम्य ३५ २

योंतरात्मामनोमयइतिप्रसिद्धं तस्ययन्तदेवशिवःऋग्वेदिगणः पतः सामोत्तरःपतुरमादिक्रुते तथा
चश्रिवालायो आत्मतुर्याससमेत्यापन्निनोपुंकेविवत्तया मनःकायाग्निमाहत्स्मस्त्रेयतिमारुतं सा
रुतस्तुरसिचरन्मेइजनयतिस्वरमित्यादि ३४ अपिस्वित्किंचितअन्येचस्वस्तिचरंतिनिजस्यदेहादिव्य
तिरिक्तस्यात्मनोदैवंश्रीकृष्णमनन्यवृत्त्याएकांतभक्तिभावेनयेसम्यगनुव्रताअनुरक्ताः हृदीकश्चसत्यभामा
याआत्मजश्चचारुदेष्णः चारुदेष्णश्चेतिपाव आदिर्येषांतेपि ३५ २ स्व
ग्दः

गुरूणां कुलसौहृदकृतिनवभिः भ्रात्रस्य: शौरिर्वसुदेवः यद्वा भामो भगिनीभर्तृकुंती वसुदेवस्य भगिनी यतो देवकी
पांडोर्भगिनीति लोकख्यातिनवर्णनं वदंस: प्रद्युम्न: बुधाणां नयतीनां तर्पणो नसेनाघोणो नसह .. वद्वृष्णाधिप
तिः सेनानीः आदिसर्गे पूर्वजन्मनि स्मरे कामे सुतशुभिलेभे पूर्वे लब्धवृत्ती २७ साम्बवनादीनामधिप उग्रसेनः श्री
नपत्रनेत्रः श्रीकृष्णः नृपासना शोभा राज्याभिलाषे पवित्र मयाणां भयेन हरेस्थितमिमं पर्य: २९ हे सौम्य हरेः सूनः ते

कच्चित्कुरूणां परमः सुहृन्नो भामः स आस्ते सुखमंगशौरिः यो वै स्वसॄणां पितृवद्ददाति वरान्वद
न्यो वरतर्पणेन २२ कच्चिद्वरूथाधिपतिर्यदूनां प्रद्युम्न आस्ते सुखमंगवीरः यं रुक्मिणी भगवतो
भिलेभे आराध्य विप्रान्स्मरमादिसर्गे २८ कच्चित्सुखं सात्वतवृष्णिभोजदाशार्हकाणामधिपः स
आस्ते यमभ्यषिंचच्छतपत्रनेत्रो नृपासनाशां परिहृत्य दूरात् २९ कच्चिद्धरेः सौम्य सुतः सदृक्ष
आस्तेऽग्रणी रथिनां साधु साम्बः असूत यं जाम्बवती व्रताढ्या देवं गुहं योऽम्बिकया धृतोऽग्रे ३० क्षेमं
स कच्चिद्युयुधान आस्ते ग्रणी रथिनां साधु साम्बः असूत यं जाम्बवती व्रता यः फल्गुनाल्लब्धधनूरह
स्यः लेभेंजसाधोक्षजसेवयैव गतिं तदीयां यतिभिर्दुरापां ३१ कच्चिद्बुधः स्वस्त्यनमीव आस्ते
श्वफल्कपुत्रो भगवत्प्रपन्नः यः कृष्णपादांकितमार्गपांसुष्वचेष्टत प्रेमविभिन्नधैर्यः ३२ ॥

न सहन्सहनः सायुक्त स्व मास्ते गुहं कार्तिकेयं अग्रे पूर्वजन्मनि योऽम्बिकया भवान्या गर्भे धृतवती ३० युयुधानः।
सात्यकिः क्षेमं कुशलमास्ते फल्गुनादर्जुनाल्लब्धं धनुर्वेदरहस्येन तदीयां यतिभिः योगिजनसेवधिनी ३१ श्व
फल्कपुत्रोऽक्रूरः बुधो विद्वान् भगवत्प्रपन्नः अनमीवः निरामयः अक्रूरो लिंगयो वेष्टत यत्संवत ३

तत्र प्रभासे परस्परं स्पर्धया विभिन्न भूतया यादवाः दांकी रत्नानां विनष्टिं विनाशम् आप्नोत् । परस्परं नाशो दृष्टो ततः वेणुजं
वह्निसंश्रयते । यद्वनं तत्र यादवध्वंसं भवति । तत्र प्रभासकुण्डं माभिस्रुते ॥ २१ ॥ चितादीनां सेकादशानीयानि तत्र मानुः
प्रसिद्धान्यासां वितनवान् ॥ २२ ॥ द्विजदेवैर्ऋषिभिर्देवैश्च कृतानि श्रेयसेऽत्र प्रतिवर्तते । इति प्रभासमाहात्म्ये प्रथानि निवृत्तानि
वक्तेनोक्तानि मूर्धन्य हस्तकुंभेषु चिह्नानि येषु तानि नाना विधानि विलोक्य तत्रानि देवतानि तीर्थानि वीक्ष्य

तत्रायं प्रभासक्षेत्रे द्विजैर्हि वनं यत्र वेणुज वह्निसंश्रयं । संस्पर्धयादवमण्डलं प्रशोचन् सरस्वतीम्
अभिगायान्तली ॥ २१ ॥ तस्यां चितस्यो भानसोमतो सूर्यो वरुणो गुरुसितस्य वायोः तीर्थस्थानसमावा
गृहस्य यत्कुण्डं देवस्य सम्यक् सिद्धे ॥ २२ ॥ अन्यानि च द्विजदेवदेवैः कृतानि नायतनानि विलोक्य प्रये
यासु स्थितो कितने मंदिराणि यादवानां तत्कुलम् अनुस्मरति ॥ २३ ॥ ततस्त्वतिक्रम्य स्वराष्ट्र सिद्धं । सो वीरमा
ल्यान्तरूपजांगलांश्च । कालेन तावद्यमुनां सुपुण्यां तत्रोद्धवं भागवतं ददर्श ॥ २४ ॥ स वासुदेवानुचरं प्र
शान्तं बृहस्पतेः प्राग्तनयं प्रतीतम् । आलिंग्य गाढं प्रणयेन भद्रं स्वानामपृच्छद् भगवत्प्रजानाम् ॥ २५ ॥
कच्चित्पुराणौ पुरुषौ स्वनाभ्यपद्मानुवृत्त्येह किलावतीर्णौ । आसात उर्व्याः कुशलं विधाय कृतक्षणौ
कुशलं शूरगेहे ॥ २६ ॥

गृहेषु चक्रांकित मंदिरवतां ... र्शनात् ॥ २२ ॥ प्रतिक्रम्य प्रतिक्रमण यांद्धवः प्रभासः तावद्य मपियमुना
सुपत्मसा विदुरः प्रभासेनये पूर्वं शिष्यं नीति शास्त्रं प्राचीनं तत्प्रभासेनयो नीति शास्त्रं येन तस्य प्रतीतं प्रख्यातं स्वानां ज्ञातीनां भ
द्रम पृच्छत् । प्रश्नोद्देशः भगवतः प्रजानां पोष्याणां ॥ २५ ॥ प्रश्नमेव तावत् रामकृष्णयोः कुशलं पृच्छति । कच्चिदिति प्र
श्नः स्वनाभोऽभवः स्वनाभ्यः पाद्मः ब्रह्मा तस्यानुवृत्त्या प्रार्थनया इह अवतीर्णौ कुशलमासाते वर्तते कृतक्षणोत्सा
वसरो सर्वेषां कृतोत्सवाविति वा तयोर्निम कुशलं ते पिउ कृ विशेषणं विशिष्टो पूर्वसेन स्य गृहे कच्चिदिति आसात्ते ॥

श्री॰ भाग॰ टी॰ ३ ततो निर्गमनतीर्थाटनप्रकारमाह सइत्यष्टभिः सगजाह्वयान्निर्गतः सन् तीर्थं पादे यस्य तस्य हरेः पदानि क्षेत्राणि पुण्य
चिकीर्षया अन्वाक्रामत् पर्यपद्यत कौरवाणां पुण्येन लब्धइति तेषां भाग्यमवतेन रूपेण तानि तिस्तिष्ठति स्वधिष्ठितः सह
स्रमूर्तिः बहुतिरुद्रायनेकमूर्तिः सन् तीर्थपात् यान्यधिष्ठाय स्थितः तानि तानि इत्यर्थः ॥१७॥ पुण्यानि यान्यु
पवनादीनि तेषु कुंजेषु लतागृहेषु अपंकानि तोयानि येषां तेषु सरित्सरस्सु तीर्थेषु आयतनेषु च देवगृहेषु कौ

स निर्गतः कौरवपुण्यलब्धो गजाह्वयात्तीर्थपदः पदानि । अन्वाक्रमत्पुण्यचिकीर्षयोर्व्यां स्वधिष्ठितो या
नि सहस्रमूर्तिः १७ पुरेषु पुण्योपवनाद्रिकुंजेष्वपंकतोयेषु सरित्सरस्सु अनंतलिंगैः समलंकृते
षु चचार तीर्थायतनेष्वनन्यः १८ गां पर्यटन्मेध्यविविक्तवृत्तिः सदाप्लुतोधःशयनोवधूतः अलक्षि
तः स्वैरवधूतवेषो व्रतानि चेरे हरितोषणानि १९ इत्थं व्रजन्भारतमेव वर्षं कालेन यावद्गतवा
न्प्रभासं तावच्छशास क्षितिमेकचक्रामेकातपत्रामजितेन पार्थः २० २१ ॥ ॥ ५७

रुषेषु अनंतस्य लिंगैः मूर्तिभिः सम्यगलंकृतेषु अनन्यः एकाकी ॥१८॥ किंच गां पर्यटन् व्रतानि चेरे आचरत्
मेध्या पवित्रा विविक्ता असंकीर्णा वृत्तिर्जीविका यस्य सदाप्लुतः प्रतितीर्थं स्नातः अधःशयनं यस्य अवधूतः
असंस्कृतदेहः अवधूतवेषो वल्कलादिधारी अतएव स्वैरलक्षितः ॥१९॥ एकस्यैव चक्रं सैन्यं यस्यास्तामेकमेवरा
नः चिह्नं छत्रं तातपत्रं यस्यास्ता अजितेन श्रीकृष्णेन सहायेन ॥२०॥ ३

दुर्योधनः तत्र मम्यतइति चेदत आह स एष मूर्तो दोष एव गृहान्प्रविष्ट आस्ते दोषत्वे हेतुः पुरुषद्विट् स्त्रीकामो दे
हान्तो सौ यं त्वमपत्यबुद्ध्या पुष्णासि न त्वयं ते मसीन पत मस्मादिति स्य पत्यमाहुः गता स्त्रीर्यस्मात्त्वमिति आ
को शतिअतएव मसीव समेव लेआश्रमत्त कर्षपुत्रस्यान्य आह कुलस्य कोशलाय मम मेदे कुलस्यार्थे
इतिद्विसायः १२ इत्थं विवान एवमुक्तवान् असौ तनासतां सुहृणी येशीलेय स्पसः कर्णांदुः आसनशाकु
निसहितेन दुर्योधनेन तिरस्कृतः १४ तिरस्कारमाह कदतिदासीसुतो सर्ववाक्यानानर्हः जित्यश्च कुटिलः जि

स एव दोषः पुरुषद्विडास्ते गृहान्प्रविष्टो यमपत्यबुद्ध्या पुष्णासि कृष्णाद्धि मुखो गतश्रीस्त्यज्यतामेषो
वकुलकोशलाय १२ इत्यूविवांस्त्वे सयोधनेन प्रवृद्धकोपस्फुरिताधरेण असत्कृतः सत्
सुहृणीयशीलः तं त्रासकर्णानुजसौबलेन १४ कर्णवमन्नोपजहावतिस्ते दासाः सुतेयद्बलि
नैव पुष्टः तस्मिन्प्रतीपः परकृत्यमास्ते निर्वास्यतामाशुपुराच्छसानः १५ सहत्यमत्सुलणोका
र्णवाणैः भ्रातः पुरो मर्मसुताडितोपि स्वयं धनुर्द्वारि निधाय माया गतव्यथो याउक्रमयमानः
१६

सतामाह यस्य बलिनानेन पुष्टः तस्मिन्नेव प्रतीपः प्रतिकूलः परेषां कार्ये वर्तते अतः पुरान्निर्वास्यतां श्व
सानः श्वसन् जीवमात्रशोषयत्यर्थः पाठान्तरे शमयान वदन्तेगालः १५ अत्युल्वणैः कर्णयोर्बाणैव प्रविश
द्भिः परुषवाक्यैर्मर्मसुताडितो पि गतव्यथः तत्र हेतुः मायामुरुबहुमन्यमानः अहो मायायाम् महात्म्य मि
तितामेव तत्र हेतुमन्यमानः तत्तिरस्कारणामनस्वियमेवा यात निर्गाम किं कुर्वात एते न मरिष्यति किं ध
नुषेति तस्य द्वारि धनुर्निधाय यद्वा भीमादिभिः सार्धं युद्धाभियोग नास्तीति मायां बुद्धितिधनुर्निधानं १६ ॥

राम स्यापि कु
त्रेनुयामेजं
स्यापैमातलं
नीलजेनेदे

सं

श्री॰ भा॰ टी॰ २

यानि च वनानि पुंसां भीमादीनां प्रशस्तायनानि प्रशस्तस्थानानि राज्ञा धृतराष्ट्रः दुर्योधनो वा उरुवृहन्नसेनेत्युक्तो
नष्टः पुण्यलेशाय स्मसः न स्मरवकीर्तिः धर्मादिहेतुः किं तु राज्यप्राप्तिमात्रहेतुः पुण्यलेशप्रवासी च स्या पिन
मृत्वा दत्तनाद्दत्तवानित्यर्थः ८ इदानीं विदुरस्यैव कृतं पराभवं दर्शयति धृ॰ इः यदा पूर्वजेन मंत्राय पृष्टो न त
तदेवाह अजातशत्रोरिति त्रिभिः तवागः अपराधसहमानस्य दायं प्रतियच्छ देहि यत्तापकार्येऽनुजेः सह वर्तमान

यदा च पार्थप्रहितः सभायां जगद्गुरुर्यानि जगाद कृष्णः ननानि पुंसाममृतायनानि राज्ञोरु
मेने क्षतपुण्यलेशः ९ यदोपहूतो भवनं प्रविष्टो मंत्राय पृष्टः किल पूर्वजेन अथाह तन्मंत्र
दृशां वरीयान्यन्मंत्रिणो वैदुरिकं वदन्ति १० अजातशत्रोः प्रतियच्छ दायं तितिक्षतो दुर्विषहं
तवागः सहानुजो यत्र वृकोदराहिः श्वसन्रुषा यत्त्वमलं बिभेषि ११ पार्थांस्तु देवो भ
गवान्मुकुन्दो गृहीतवान्सक्षितिदेवदेवः आस्ते स्वपुर्यां यदुदेवदेवो विनिर्जिताशेषनृदेव

देवः १२

ते यस्मात्त्वं बिभेषि ११ ममतोरस्यां बहवः सन्तीति गर्वं मा कृथा इत्याह पार्थानिति मुकुन्दः आत्मीयत्वे
न गृहीतवान् स च देवस्तत्रापि भगवान्न तु प्राकृतः किं च सह क्षितिदेवैर्विप्रैर्देवैः वैकुण्ठादिभिर्वर्तमानः य
तोऽसौ तत एव विप्रादेवाश्रयत्वादर्थः स च स्वपुर्यामेव सुखमास्ते न त्वन्यत्र गतः किं च यदुदेवानां देवः पूज्यः
यतोऽसौ तत एव यदुप्रवीरा इत्यर्थः किं च नृदेवेषु मंडलेश्वरेषु दीव्यतीति प्रकाशयतीति नृदेवाः राजानः
विनिर्जिता अशेषनृदेवदेवा येन यतोऽसौ तत एव सर्वे राजानः अतः पार्थानां दायं देहीति १२ राम ॥

मोहकोऽद्राहि
क्रोधम्प्रसन्नं
१

लं॰
अ॰ २

२

कुरुसंगमः आसीदभूव ३ वरीयसि श्रेष्ठे अल्पस्यार्थस्योदयो यस्मात् तथाभूतो न भवति साधुवादेन सतामनु मोदनेन उपबृंहितः संवर्धितः यद्वा साधोः मैत्रेयस्य वादेनोत्तरेणोपबृंहितः इत्यर्थः ॥४॥ सा यायानुहेस्यापि गृहस्य स्वाभिहितत्वेन कौरवपाण्डवानाम् यदेति द्वाभ्यां एतयोश्च तदा च सततानुयातित्येकादशी क्रिया संबन्धः ॥

राजोवाच कुरुक्षेत्रे भगवता मैत्रेयेण समागमः कदा वा सह संवाद एतद्वर्णय नः प्रभो ॥३॥ न ह्यल्पार्थोदयस्तस्य विदुरस्यामलात्मनः तस्मिन् वरीयसि प्रश्नः साधुवादोपबृंहितः ॥४॥ सूत उवाच स एवमृषिवर्योऽयं पृष्टो राज्ञा परीक्षिता प्रत्याह तं सुबहुवित्प्रीतात्मा श्रूयतामिति ॥५॥ श्रीशुक उवाच यदा तु राजा स्वसुतानसाधून् पुष्णन्नधर्मेण विनष्टदृष्टिः भ्रातुर्यविष्ठस्य सुतान् विबन्धून् प्रवेश्य लाक्षाभवने ददाह ॥६॥ यदा सभायां कुरुदेवदेव्याः केशाभिमर्शं सुतकर्म गर्ह्यं न वारयामास नृपः स्नुषायाः स्वास्रैर्हरन्त्याः कुचकुंकुमानि ॥७॥ द्यूते त्वधर्मेण जितस्य साधोः सत्यावलम्बस्य वनागतस्य न याचतोऽदात्समयेन दायं तमोजुषाणो यदजातशत्रोः ॥८॥

यविष्ठस्य कनिष्ठस्य पाण्डोः विबन्धून् पितृहीनान् ॥६॥ कुरुदेवस्य युधिष्ठिरस्य देव्याः द्रौपद्याः आत्मनः स्नुषायाः स्वास्रैः स्वाश्रुभिः स्वकुचकुंकुमानि विप्रलुम्पन्ती वा तद्वर्तिवधनं हरन्त्याः ॥७॥ सत्यावलम्बस्य सत्यमाश्रयस्य वनात् आगतस्य समयेन पूर्वकृतेन दायं याचमानस्य यद्दायं नादात् तत्तमो मोहं जुषाणः सेवमानः अविवेकवान् ॥८॥ रामायनमः

श्री॰
भा॰टी॰
टी॰
३

ॐ श्रीगणेशाय नमः ॥ ॐ ॥ तृतीये त्वत्र षट्त्रिंशद् अध्यायैः सर्गवर्णनं ॥ ईशो लयाद्गुणक्षोभान्महदादिब्रह्मादिसंभवः ॥ तत्र प्रथमाध्याये वर्ण्यते पांडवाहितात्युद्धः ॥ विराट्तस्योद्धवेनादौ संवादः तत्र वर्ण्यते ॥ अथ तृतीयस्कंधव्याख्या ॥ भगवद्भक्तसेवा श्लोकसंहितां संवर्णितपूर्वा ॥ प्राक् भागवते श्लोकशोभां विस्तरतः पुनः ॥ द्वितीयद्विश्रीभागवतसंप्रदायप्रवृत्तिः ॥ एकतः संक्षेपतः श्रीनारायणात् ब्रह्मनारदादिद्वारेण ॥ अन्यतस्तु विस्तरतः शेषात्सनत्कुमारसांख्यायनादिद्वारेण ॥ तत्र द्वितीये श्रीनारायणब्रह्मसंवादसंक्षेपतः चतुःश्लोकी श्रीभागवतं निरूपितं ॥ तद्वेव ब्रह्मनारदसंवादेन दशलक्षणानयाकिंचिद्विस्तरेणोक्तं ॥ तदेवशेषोक्तमति विस्तरतो वक्तुं तृतीयाध्याये

श्रीशुक उवाच ॥ एवमेतत्पुरा पृष्टो मैत्रेयो भगवान्किल ॥ क्षत्त्रा वनं प्रविष्टेन त्य-
क्त्वा स्वगृहमृद्धिमत् ॥ १ ॥ यद्वा अयं मन्त्रकृद्वो भगवानखिलेश्वरः ॥
पौरवेंद्र कौरवेंद्रगृहं हित्वा प्रविवेशात्मसात्कृतम् ॥ २ ॥

मः ॥ तत्र तृतीयप्रथमं तन्मैत्रेयसंवादः चतुर्भिरध्यायैः ॥ ततोऽष्टभिः सविसर्गः सर्गप्रपंचः ॥ ततो विसर्गप्रस्तावेन सप्तभिर्वराहावतारः ॥ ततः एकेन विसर्गसमाहारः ॥ तत्र संक्षेपेन चतुर्भिः कपिलावतारः ॥ ततो नवभिः कपिलाख्यानमिति त्रयस्त्रिंशताध्यायैः तृतीयस्कंधप्रवृत्तिः ॥ तत्र द्वितीयांते परिमाणं च कालस्य कालं लक्षणविग्रहं यथा पुरस्ताद्व्याख्यास्ये पाद्मं कल्पमथो शृणु इति प्रतिज्ञातस्यार्थं विस्तरेण निरूपयितुमितिहासं प्रस्तौति एवमिति द्वाभ्यां ऋद्धिमत्सर्वसंपद्भिः पूर्णं ॥ किंचातिश्लाघ्यमपाग्रणीर्नेऽम्भीत्याह यद्वेति प्रसिद्धगृहेषु पांडवानां मंत्रकृत् दौत्यकृत् आसनप्रयं श्रीकृष्णो बुद्धिसंविधानादयमिति निर्दिष्टः ॥ कौरवेंद्रो दुर्योधनः तस्य गृहं हित्वा अनाहूत एव प्रविवेश ॥ तत्र हेतुः आत्मसात्कृतं आत्मीयत्वेन गृहीतम् ॥ २ ॥ पौरवेंद्रो दुर्योधनः २

कल्प॰

वि॰ हृ॰ हृ॰